
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

इतियाज्ञवल्कीयेधर्मशास्त्रेसमाप्तः

४

मेषवा॥ साङ्गोऽयं स धर्मः स्यादेको वाध्यात्मवित्तमः॥ ९॥ इत्युपोद्घातप्रकरणं॥ ब्रह्मक्षत्रियविट्
शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः॥ निषेकादिश्मशानान्तास्तेषां वै मंत्रतः क्रियाः॥१०॥ गर्भाधानमृ
तौ पुंसः सवनं स्पंदनात्पुरा॥ षष्ठेऽष्टमे वा सीमंतो मास्येते जातकर्म च॥११॥ अहन्येकादशे नाम
चतुर्थे मासि निष्क्रमः॥ षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलं॥१२॥ एवमेनः शमं याति
बीजगर्भसमुद्भवं॥ तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समंत्रकः॥१३॥ गर्भाष्टमेऽष्टमे वाब्दे
ब्राह्मणस्योपनायनं॥ राज्ञामेकादशे सैके विशामेके यथाकुलं॥१४॥ उपनीय गुरुः शिष्यं
महाव्याहृतिपूर्वकं॥ वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्॥१५॥ दिवासंध्यासु कर्ण
स्थब्रह्मसूत्र उदङ्मुखः॥ कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः॥१६॥ गृहीतशिश्नश्चो
त्थाय मृद्भिरभ्युद्धृतैर्जलैः॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥१७॥ अंतर्जानुः शुचौ दे

शौचउपविष्टउदङ्मुखः ॥ प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥ १९ ॥ कनिष्ठादेशिन्यंगुष्ठमू
लान्यग्रं करस्य च ॥ प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ २० ॥ त्रिः प्राश्यापो द्विरुन्मृज्य खा
न्यद्भिः समुपस्पृशेत् ॥ अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ॥ हृत्कंठतालुगाभिस्तु यथा
संख्यं द्विजातयः ॥ शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः ॥ २१ ॥ स्नानमंबुवते मंत्रैर्मार्जनं प्रा
णसंयमः ॥ सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः ॥ २२ ॥ गायत्रीं शिरसा सार्द्धं जपेद्व्या
हृतिपूर्विकां ॥ प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥ २३ ॥ प्राणानायम्य संप्रोक्ष्य त्र्यचे
नाब्दैवतेन तु ॥ जपं नासीन सावित्रीं प्रत्यगातारकोदयात् ॥ २४ ॥ संध्यां प्राक्प्रातरेवं हि ति
ष्ठेदा सूर्यदर्शनात् ॥ अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि ॥ २५ ॥ ततो भिवादयेद्वृद्धा
नसावहमिति ब्रुवन् ॥ गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः ॥ २६ ॥ आदूतश्चा

दि॰२

यैधीयीत लब्धं वास्मै निवेदयेत् हितं वास्य चरेन्नित्यं मनोवाक्कायकर्मभिः २७ कृतघ्नद्रोहि
[illegible]मेधारिपुविकल्पानसूयकाः अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः २८ दंडाजिनोपवी
तानि मेखलां चैव धारयेत् ब्राह्मणपूर्वश्रेष्ठ्यमनिंद्यमात्मरत्नयोः २९ आदिमध्यावसाने
षु भवच्छब्दोपलक्षिताः ब्राह्मणक्षत्रियविशां भैक्ष्यचर्या यथाक्रमं ३० कृतानि कार्याण्यभुंजीत
वाग्यतो गुर्वनुज्ञया आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ब्रह्मचर्ये स्थितो नैकम
न्नमाद्यादनापदि ब्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीडयन् ३२ मधुमांसांजनोच्छिष्ट
दैव ७ शुक्ल स्त्रीप्राणिहिंसनं भास्करालोकनाश्लीलपरिवादादि वर्जयेत् ३३ स गुरुर्यः क्रियाः कृ
त्वा वेदमस्मै प्रयच्छति उपनीय ददद्वेदमाचार्यः स उदाहृतः ३४ एकदेशमुपाध्यायः ऋत्वि
ग्यज्ञकृदुच्यते एते मान्या यथापूर्वमेभ्यो माता गरीयसी ३५ प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दा
नि पंच वा ग्रहणांतिकमित्येके केशांतश्चैव षोडशे ३६ आषोडशाद्द्वाविंशाच्च चतुर्विंशाच्च वत्स
दा

रात् ब्रह्मक्षत्रविशांकालश्चोपनायनिकः परः ३७ अतऊर्ध्वंपतंत्येतेसर्वधर्मबहिष्कृताः सावित्रीपति
ताव्रात्याव्रात्यस्तोमादृतेक्रतोः ३८ मातुर्यदग्रेजायंतेद्वितीयंमौंजिबंधनात् ब्राह्मणक्षत्रियविशस्तस्मा
देतेद्विजाःस्मृताः ३९ यज्ञानांतपसांचैवशुभानांचैवकर्मणां वेदएवद्विजातीनांनिःश्रेयसकरःपरः ४०
मधुनापयसाचैवसदेवांस्तर्पयेद्विजः पितॄन्मधुघृताभ्यांचऋत्त्वोधीतेतुयोन्वहं ४१ यजूंषिशक्ति
तोधीतेयोन्वहंसघृतामृतैः प्रीणातिदेवानाज्येनमधुनाचपितॄंस्तथा ४२ सतुसोमघृतैर्देवांस्त
र्पयेद्योन्वहंपठेत् सामानितृप्तिंकुर्याच्चपितॄणांमधुसर्पिषा ४३ मेदसातर्पयेद्देवानथर्वांगि
रसःपठन् पितॄंश्चमधुसर्पिर्भ्यामन्वहंशक्तितोद्विजः ४४ वाकोवाक्यंपुराणांचनाराशंसीश्च
गाथिकाः इतिहासांस्तथाविद्याःशक्त्याधीतेतुयोन्वहं ४५ मांसक्षीरौदनमधुतर्पणंसदिवौक
सां करोतितृप्तिंचतथापितॄणांमधुसर्पिषा ४६ तेतृप्तास्तर्पयंत्येनंसर्वकामफलैःशुभैः यंयंक्र
तुमधीतेचतस्यतस्याप्नुयात्फलं ४७ त्रिर्वित्तपूर्णपृथिवीदानस्यफलमश्नुते तपसश्चप ॥३॥

रस्येहनित्यंस्वाध्यायवान्द्विजः ४८ नैष्ठिकोब्रह्मचारीतुवसेदाचार्यसंनिधौ तदभावेस्यतन
येपत्न्यांवैश्वानरेपिवा ४९ अनेनविधिनादेहंसाधयन्विजितेंद्रियः ब्रह्मलोकमवाप्नोतिन
चेहजायतेपुनः ५० इतिब्रह्मचारिप्रकरणं गुरवेतुवरंदत्वास्नायीततदनुज्ञया वेदंव्रतानि
वापारंनीत्वाह्युभयमेववा ५१ अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत् अनन्यपूर्विकांकांता
मसपिंडांयवीयसीं ५२ अरोगिणींभ्रातृमतीमसमानार्षगोत्रजां पंचमात्सप्तमादूर्ध्वंमातृतः
पितृतस्तथा ५३ दशपूरुषविख्याताच्छ्रोत्रियाणांमहाकुलात् स्फीतादपिनसंचारिरोगदो
षसमन्वितात् ५४ एतैरेवगुणैर्युक्तः सवर्णः श्रोत्रियोवरः यत्नात्परीक्षितः पुंस्त्वेयुवाधीमा
न्जनप्रियः ५५ यदुच्यतेद्विजातीनांशूद्राद्दारोपसंग्रहः नैतन्ममयतंयस्मात्तत्रायंजाय
तेस्वयं ५६ तिस्रोवर्णानुपूर्व्येणद्वेतथैकायथाक्रमं ब्राह्मणक्षत्रियविशांभार्याःस्वाशू
द्रजन्मनः ५७ ब्राह्मोविवाहआहूयदीयतेशक्त्यलंकृता तज्जःपुनात्युभयतःपुरुषान्

४

विंशतिं ५८ यज्ञस्थऋत्विजे दैवआदायार्षस्तु गोद्वयं चतुर्दशप्रथमजः पुनात्युत्तरजश्च षट् ५९
इत्युक्त्वाचरतांधर्मंसहयादीयतेर्थिने सकायःपावयेत्तज्जः ष॰ ट्षड्वंश्यान्सहात्मना ६०
आसुरोद्रविणादानाद्गांधर्वःसमयान्मिथः राक्षसोयुद्धहरणात्पैशाचःकन्यकाछलात् ६१
पाणिर्ग्राह्यःसवर्णासुगृह्णीयात्क्षत्रियाशरं वैश्याप्रतोदमादद्याद्वेदनेत्वग्रजन्मनः ६२
पितापितामहोभ्रातासकुल्योजननीतथा कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः ६३
अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ गम्यंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरं ६४
सकृत्प्रदीयतेकंन्याहरंस्तांचोरदंडभाक् दत्तामपिहरेत्पूर्वाछ्रेयांश्चेद्वरआव्रजेत् ६५
अनाख्यायददद्दोषंदंड्यउत्तमसाहसं अदुष्टांचत्यजन्दंड्योदूषयंस्तुमृषाशतं ६६
अक्षताचक्षताचैवपुनर्भूःसंस्कृतापुनः स्वैरिणीयापतिंहित्वासवर्णंकामतःश्रयेत् ६७
अपुत्रांगुर्वनुज्ञातो देवरःपुत्रकाम्यया सपिंडोवासगोत्रोवाघृताभ्यक्तऋतावियात् ६८

४

आगर्भसंभवाज्ञ्छेत्सलिलस्त्वन्यथाभवेत् अनेनविधिनाजातःक्षेत्रजोस्यभवेत्सुतः ६९
हृताधिकारांमलिनांपिंडमात्रोपजीविनीं परिभूतामधःशयांवासयेद्व्यभिचारिणीं ७०
सोमःशौचंददौस्त्रीणांगंधर्वश्चशुभांगिरं पावकःसर्वमेध्यत्वंमेध्यावैयोषितोह्यतः ७१
व्यभिचाराहृतौशुद्धिर्गर्भेत्यागोविधीयते गर्भभर्तृवधादौचतथामहतिपातके ७२ सु
रापीव्याधिताधूर्तावंध्यार्थघ्न्यप्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथा ७३
अधिविन्नातुभर्तव्यामहदेनोन्यथाभवेत् यत्रानुकूल्यंदंपत्योस्त्रिवर्गस्तत्रवर्द्धते ७४
मृतेजीवतिवापत्यौयानान्यमुपगच्छति सेहकीर्तिमवाप्नोतिमोदतेचोमयासह ७५
आज्ञासंपादिनींदक्षांवीरसूंप्रियवादिनीं सजन्दाप्यस्तृतीयांशमद्रव्योभरणंस्त्रियाः
७६ स्त्रीभिर्भर्तृवचःकार्यमेषधर्मःपरस्त्रियाः आशुद्धेःसंप्रतीक्ष्योहिमहापातक
६ दूषितः ७७ लोकानंत्यंदिवःप्राप्तिःपुत्रपौत्रप्रपौत्रकैः यस्मात्तस्मात्स्त्रियःसे

५

व्याः कर्तव्याश्चसुरक्षिताः ७८ षोडशार्तुर्निशास्त्रीयांतस्मिन्युग्मासुसंविशेत् युग्मासुपु
त्राजायंते स्त्रियोऽयुग्मासुरात्रिषु ७९ ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेत् एवंगच्छन्
स्त्रियंक्षामांमघांमूलंचवर्जयेत् ८० सुस्थइंदौसकृत्पुत्रंलक्षण्यंजनयेत्सुमान् यथाकामी
भवेद्वापिस्त्रीणांवरमनुस्मरन् ८१ स्वदारनिरतश्चैवस्त्रियोरक्ष्यायतस्मृताः भर्तृभ्रा
तृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ८२ बंधुभिश्चस्त्रियःपूज्याभूषणाच्छादनाशनैः
संयतोपस्करादक्षाहृष्टाव्ययपराङ्मुखी ८३ कुर्याच्छ्वशुरयोःपादवंदनंभर्तृतत्परा
क्रीडाशरीरसंस्कारसमाजोत्सवदर्शनं ८४ हास्यंपरगृहेयानंत्यजेत्प्रोषितभ
र्तृका रक्षेत्कन्यांपितावित्तांपतिःपुत्राश्चवार्द्धके ८५ अभावेज्ञातयस्तेषांस्वातंत्र्यं
नकचित्स्त्रियाः पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः ८६ हीनानस्याद्वि
नाभर्त्रा गर्हणीयान्यथाभवेत् पतिप्रियहितेयुक्तास्वाचाराविजितेंद्रिया ८७

५

इहकीर्तिमवाप्नोति प्रेत्यचानुत्तमांगतिं सत्यामन्यांसवर्णायांधर्मकार्यंनकारयेत् ८८ सवर्णा
सुविधौधर्म्येज्येष्ठयानविनेतराः दाहयित्वाग्निहोत्रेणस्त्रियंवृत्तवतींपतिः ८९ आहरेद्विधि
वद्दारानग्नींश्चैवाविलंबयन् इतिविवाहप्रकरणं सवर्णेभ्यःसवर्णासुजायंतेहिसजातयः ९०
अनिंद्येषुविवाहेषुपुत्राःसंतानवर्द्धनाः विप्रान्मूर्द्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां ९१ अंब
ष्ठःशूद्र्यांनिषादोजातःपारशवोपिवा वैश्याशूद्र्योस्तुराजन्यान्माहिष्योग्रौसुतौस्मृतौ ९२
वैश्यात्तुकरणःशूद्र्यांविन्नास्वेषविधिःस्मृतः ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहकस्तथा ९३
शूद्राज्जातस्तुचांडालःसर्वधर्मबहिष्कृतः क्षत्रियामागधंवैश्याच्छूद्रात्क्षत्तारमेवच ९४ शूद्रादा
योगवंवैश्याजनयामाससवैसुतं माहिष्येणकरण्यांतुरथकारःप्रजायते ९५ असत्संतस्तुविज्ञे
याःप्रतिलोमानुलोमजाः जात्युत्कर्षोयुगेज्ञेयःसप्तमेपंचमेपिवा ९६ व्यत्यये कर्मणांसा
म्यंपूर्ववच्चाधरोत्तरं इतिवर्णजातिविवेकप्रकरणं कर्मस्मार्तंविवाहाग्नौकुर्वीतप्रत्यहंगृ

६

ह्रौ ९७ दायकालाहृतेवापिश्रौतवैतानिकाग्निषु शारीरचिंतांनिर्वर्त्यकृतशौचविधिर्द्विजः
९८ प्रातःसंध्यामुपासीतदंतधावनपूर्वकं कृत्वाग्नीन्सूर्यदैवत्यान्जपेन्मंत्रान्समाहितः
९९ वेदार्थानधिगच्छेच्च शास्त्राणिविविधानिच उपेयादीश्वरंचैवयोगक्षेमार्थसिद्ध
ये १०० स्नात्वादेवानृपितॄंश्चैवतर्पयेदर्चयेत्तथा वेदाथर्वपुराणानिसेतिहासानिशक्तितः १
जपयज्ञप्रसिद्ध्यर्थंविद्यांचाध्यात्मिकींजपेत् बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः २
भूतपित्रमरब्रह्ममनुष्याणांमहामखाः देवेभ्यश्चहुतादन्नाच्छेषाद्भूतबलिंहरेत् ३ अन्नं
भूमौश्वचांडालवायसेभ्यश्चनिक्षिपेत् अन्नंपितृमनुष्येभ्योदेयमप्यन्वहंजलं ४ स्वाध्या
यंचान्वहंकुर्यान्नपचेदन्नमात्मने बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः ५ संभो
ज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनं आपोशानेनोपरिष्टादधस्तादश्नतातथा ६ अ
नग्नममृतंचैवकार्यमन्नंद्विजन्मना अतिथित्वेथवर्णानांदेयंशक्त्यानुपूर्वशः ७ अप्र

न२

६

णो घोतिथिः सायमपि वागन्नतृणोदकैः सत्कृत्याभिक्षवेभिक्षादातव्यासुव्रतायच ८ भो
जयेच्चागतान्काले सखिसंबंधिबांधवान् महोक्षंवामहाजंवाश्रोत्रियायोपकल्पयेत् ९ स
त्क्रियान्वासनंस्वादुभोजनंसूनृतंवचः प्रतिसंवत्सरंत्वर्घ्याः स्नातकाचार्यपार्थिवाः १० प्रि
योविवाह्यश्चतथायज्ञंप्रत्यृत्विजः पुनः अध्वनीनोतिथिर्ज्ञेयः श्रोत्रियोवेदपारगः ११ मा
न्यावेतौगृहस्थस्यब्रह्मलोकमभीप्सतः परपाकरुचिर्नस्याद॑निंद्यामंत्रणादृते १२ वा
क्पाणिपादचापल्यंवर्जयेच्चातिभोजनं अतिथिंश्रोत्रियंतृप्तमासीमांतमनुव्रजेत् १३ अ
हःशेषंसहासीनैःशिष्टैरिष्टैश्चबंधुभिः उपास्यपश्चिमांसंध्यांहुत्वाग्नींस्तानुपास्यच १४
भृत्यैःपरिवृतोभुक्त्वानातितृप्त्याथसंविशेत् ब्राह्मेमुहूर्तेचोत्थायचिंतयेदात्मनोहितं १५
धर्मार्थकामान्स्वेकालेयथाशक्तिनहापयेत् विद्याकर्मवयोबंधुवित्तैर्मान्यायथाक्रमं १६
एतैःप्रभूतैःशूद्रोपिवार्धकेमानमर्हति वृद्धभारिनृपस्नातस्त्रीरोगीवरचक्रिणां १७ पंथादे

*अनिंद्यामंत्रिणो
नाचतुरे तेनिश्रुते॥

७

योन्यस्तेषांमान्यस्तातस्वाध्यपतेः १८ इज्याध्ययनदानानिवैश्यस्यक्षत्रियस्यच प्रतिग्रहोधिकोवि
प्रयाजनाध्यापनेनतथा १९ प्रधानंक्षात्रियेकर्मप्रजानांपरिपालनं कुसीदकृषिवाणिज्यंपाशुपाल्यं
विशास्मृतं २० शूद्रस्यद्विजशुश्रूषातयाजीवन्वणिग्भवेत् शिल्पैर्वाविविधैर्जीवेत्द्विजातिहितमा
चरेत् २१ भार्यारतिःशुचिर्भृत्यभर्ताश्राद्धक्रियारतः नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेत्
२२ अहिंसासत्यमस्तेयंशौचमिंद्रियनिग्रहः दानंदमोदयाक्षांतिःसर्वेषांधर्मसाधनं २३
वयोबुध्यर्थवाग्वेषश्रुताभिजनकर्मणां आचरेत्सदृशींवृत्तिमजिह्मामशठांतथा २४ त्रै
वार्षिकाधिकान्नोयःसतुसोमंपिबेद्द्विजः प्राक्सौमिकीःक्रियाःकुर्याद्यस्यान्नंवार्षिकं
भवेत् २५ प्रतिसंवत्सरंसोमःपशुःप्रत्ययनंतथा कर्तव्याग्रयणेष्टिश्चचातुर्मास्या
निचैवहि २६ एषामसंभवेकुर्यादिष्टिंवैश्वानरींद्विजः हीनकल्पंनकुर्वीतसति
द्रव्येफलप्रदं २७ चौडाळोजायतेयज्ञकरणाच्छूद्रभिक्षितात् यज्ञार्थंलब्धमद

७

कौपिवा २

भा २ दर्भी सकौपी भवेत् २८ कुसूलकुंभीधान्यो वा त्र्याहिको श्वस्तनोपि वा जीवेद्वापि शिलोंछे
न श्रेयानेषां परः परः २९ इति गृहस्थप्रकरणं न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः
म न विरुद्धप्रसंगेन संतोषी च भवेत्सदा ३० राजांतेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा दं
भिहैतुकपाषंडीबकवृत्तींश्च वर्जयेत् ३१ शुक्लांबरधरो नीचकेशश्मश्रुनखः शुचिः न भा
र्यादर्शनेश्नीयान्नैकवासा न संस्थितः ३२ न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् नाहितं
नानृतं चैव न स्तेनः स्यान्न वार्धुषी ३३ दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमंडलुः कु
र्यात्प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन् ३४ न तु मेहेन्नदीछायावर्त्मगोष्ठांबुभस्मसु॥
लोकरं जनार्थमिव कर्मानुष्ठायी दांभिः यालिबलेन सर्वत्र संशयकारी हैतुकाः त्रैविद्यरहिताः परिगृही
ताश्रमिणः पाषंडिनः अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः शठो मिथ्याविनीतश्च बकवृत्ति

२

नप्रत्यग्न्यर्कगोसोमसंध्यांबुस्त्रीद्विजन्मनः ३५ नेक्षेतार्कं ननग्नांस्त्रीं नचसंसृष्टमैथुनां
नचमूत्रंपुरीषंवानाशुचीराहुतारकाः ३६ अयंमेवज्ञ इत्येवं सर्वं मंत्रमुदीरयन् वर्षत्सुप्रा
वृतोगच्छेत्स्वपेत् प्रत्यक्शिरानच ३७ ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सुननिक्षिपेत् पादौ
प्रतापयेत् नाग्नौ नचैनमपि लंघयेत् ३८ जलंपिबेन्नांजलिनाशयानंनप्रबोधयेत् नाक्षैःक्री
डेन्नधर्मघ्नैर्व्याधितैश्चनसंविशेत् ३९ विरुद्धंवर्जयेत्कर्मप्रेतधूम्रंनदीतरं केशभस्मतुषां
गारकपालेषुवसास्थितिं ४० नावक्षीतधयंतीगांनाद्वारेणाविशेत्क्वचित् नराज्ञःप्रतिगृ
ह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः ४१ प्रतिग्रहेसूनिचक्रिध्वजिवेश्यानराधिपाः दुष्टादश
गुणपूर्वात्पूर्वादेतेयथोत्तरं ४२ अध्यायानामुपाकर्मश्रावण्यांश्रवणेनच हस्तेनौषधिभा
वेवापंचम्यांश्रावणस्यच ४३ पौषमासस्यरोहिण्यामष्टकायामथापिवा जलांतेछंदसांकु
र्यादुत्सर्गंविधिवद्बहिः ४४ त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबंधुषु। उपाकर्मणिचोत्स

२

गेष्विचशास्वा श्रोत्रियेन तथा ४५ संध्यागर्जितनिर्घातभूकंपोल्कानिपातने समाप्य वेदं द्युनि
शमारण्यकमधीत्य च ४६ पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ऋतुसंधिषु भुक्त्वा वा
श्राद्धिकं प्रतिगृह्य च ४७ पशुमंडूकनकुलश्वाहिमार्जारमूषकैः कृतेंतरे त्वहोरात्रं शक्रपाते त
थोच्छ्रये ४८ श्वक्रोष्टुगर्दभोलूकसामबाणार्तनिःस्वने अमेध्यशवशूद्रांत्यश्मशानपति
तांतिके ४९ देशेष्वशुचिष्वात्मनि च विद्युत्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोंतेऽर्धरात्रेऽतिमारुते ५०
पांसुप्रवर्षे दिग्दाहे संध्यानीहारभीतिषु धावतः पूतिगंधे च शिष्टे च गृहमागते ५१ खरोष्ट्र
यानहस्त्यश्वनौवृक्षेरिणारोहणे सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः ५२ वै
दैर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि च ५३
विप्राहि क्षत्रियात्मानौ नावज्ञेयौ कदाचन आमृत्योः श्रियमाकांक्षेन्न किंचिन्मर्माणि स्पृ
शेत् ५४ दूरादुच्छिष्टविण्मूत्रपादांभांसि समुत्सृजेत् श्रुतिस्मृत्युदितं सम्यङ्नित्यमा

९

वारमाचरेत् ५५ गोब्राह्मणानलान्नानि नोच्छिष्टो नपदास्पृशेत् ननिंदाताडने कूर्यात्पुत्रं
छिष्यंवताडयेत् अधोभागे शरीरस्य नोत्तमांगेन वक्षसि अत्तोन्यथातु प्रहरन्पापूयु
कोपवेन्नरः ५७ कर्मणा मनसा वावा वायत्नाधर्मं समाचरेत् अस्वर्ग्यं लोकविद्विष्टं धर्ममप्या
चरेन्नतु मातापित्रतिथिभ्रातृजामिसंबंधिमातुलैः वृद्धबालातुराचार्यवैद्यसंश्रित

म

बांधवैः ५९ ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः विवादं वर्जयित्वातु सर्वांल्लोकान्
जयेद्गृही ६० पंचपिंडाननुद्धृत्य न स्नायात्परवारिषु स्नायान्नदीदेवखातह्रदप्रस्रवणे
षु च ६१ परशय्यासनोद्यानगृहयानानि वर्जयेत् अदत्तान्यग्निहीनस्य नान्नमद्यादनाप
दि ६२ कदर्यबद्धचौराणां क्लीबरंगावतारिणां वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणां
६३ चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनां ६४
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनां शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्तिनां ६५

९

न्नृशंसराजरजककृतघ्नवधजीविनां चैलधावसुराजीवसहोपपतिवेश्मनां ६६ पिशुनानृतिनोश्चै
वतथाचाक्रिकबंदिनां एषामन्नंमनभोक्तव्यं सोमविक्रयिणस्तथा ६७ शूद्रेषुदासगोपालकुलमि
त्रार्धसीरिणः भोज्यान्नानापितश्चैवय आत्मानंनिवेदयेत् ६८ इतिस्नातकप्रकरणं अनर्चितं
वृथामांसंकेशकीटसमन्वितं शुक्तंपर्युषितोच्छिष्टंश्वस्पृष्टंपतितेक्षितं ६९ उदक्यास्पृष्टसं
घुष्टंपर्यायान्नंचवर्जयेत् गोघ्रातंशकुनोच्छिष्टंपदास्पृष्टंचकामतः ७० अन्नंपर्युषितंभो
ज्यंस्नेहाक्तंचिरसंस्थितं अस्नेहाअपिगोधूमयवगोरसविक्रियाः ७१ संधिन्यनिर्दशाव
त्सगोपयःपरिवर्जयेत् औष्ट्रमेकशफंस्त्रैणमारण्यकमथाविकं ७२ देवतार्थंहविःशिग्रुं
लोहितान्व्रश्चनांस्तथा अनुपाकृतमांसानिविड्जानिकवकानिच ७३ क्रव्यादपक्षित्यू दा२
हशुकप्रतुदटिट्टिभान् सारसैकशफान्हंसान्सर्वांश्चग्रामवासिनः ७४ कोयष्टिप्लवच
क्राह्वबलाकाबकविष्किरान् वृथाकृसरसंयावपायसापूपशष्कुलीः ७५ कलविंकंस
ह्व

१०

काकोलं कुररं रज्जुदालकं जालपादान् खंजरीटानज्ञातांश्च मृगद्विजान् ७६ चाषांश्च रक्तपा
दांश्च सौनं वल्लूरमेव च मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ७७ पलांडुं विड्वराहं च छ
त्राकं ग्रामकुक्कुटं लशुनं गृंजनं चैव जग्ध्वा चांद्रायणं चरेत् ७८ भक्ष्याः पंचनखाः सेधा गोधा क
च्छपशल्लकाः शशश्च मत्स्येष्वपि हि सिंहतुंडकरोहिताः ७९ तथा पाठीनराजीवसशल्का
श्च द्विजातिभिः अतः शृणुध्वं मांसस्य विधिं भक्षणवर्जने ८० प्राणात्यये तथा श्राद्धे प्रोक्षितं
द्विजकाम्यया देवान् पितॄन् समभ्यर्च्य खादन्मांसं न दोषभाक् ८१ वसेत्स नरके घोरे दिनानि
पशुरोमभिः संमितानि दुराचारो यो हंत्यविधिना पशून् ८२ सर्वान् कामानवाप्नोति हयमे
धफलं तथा गृहेऽपि निवसन् विप्रो मुनिर्मांसस्य वर्जनात् ८३ इति भक्ष्याभक्ष्यप्रकरणं सौ
वर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनां शाककज्जुमूलफलवासोविदलचर्मणां ८४ पा
त्राणां चमसानां च वारिणा शुद्धिरिष्यते चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा ८५

१०

स्फ्यशूर्पाजिनधान्यानां मुशलोलूखलानसां प्रोक्षणं संहतानां च बहूनां धान्यवाससां ८६
तक्षणं दारुशृंगास्थ्नां गोवालैः फलसंभुवां मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ८७ सो
षैरुदकगोमूत्रैः शुध्यत्याविककौशिकं सश्रीफलैरंशुपट्टं सारिष्टैः कुतुपं तथा ८८ सगौरसर्ष
पैः क्षौमं पुनःपाकान्महीमयं कारुहस्तः शुचिः पण्यं भैक्षं योषिन्मुखं तथा ८९ भूशुद्धिर्मार्ज
नाद्दाहात्कालाद्गोक्रमणात्तथा सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात् ९० गोघ्राते
ऽन्ने तथा केशमक्षिकाकीटदूषिते सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये ९१ त्रपुसीसक
ताम्राणां क्षाराम्लोदकवारिभिः भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु ९२
अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गंधापकर्षणात् वाक्शस्तमंबुनिर्णिक्तमज्ञातं च सदा शु
चि ९३ शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं तथा मांसं श्वचांडालक्रव्यादादिनि

११

पातितं १४ रश्मिरग्निरजश्छायागौरश्वोवसुधानिलः विप्रुषोमक्षिकास्पर्शेवत्सः प्रस्नवणेशु
चिः १५ अजाश्वंमुखवतोमेध्यं नगोर्ननरजामलाः पंथानश्चविशुध्यंतिसोमसूर्यांशुमारु
तैः १६ मुखजाविप्रुषोमेध्यास्तथाचमनबिंदवः श्मश्रुचास्यगतंदंतसक्तंत्यक्त्वाततः
शुचिः १७ स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्यापसर्पणे आचांतःपुनराचामेद्वासोपि
परिधायच १८ रथ्याकर्दमतोयानिस्पृष्टान्यंत्यश्ववायसैः मारुतेनैवशुध्यंतिपक्वेष्टक
चितानिच १९ इतिद्रव्यशुद्धिः तपस्तप्त्वासृजद्ब्रह्माब्राह्मणान्वेदगुप्तये तृप्त्यर्थंपितृ
देवानांधर्मसंरक्षणायच २०० सर्वस्यप्रभवोविप्राःश्रुताध्ययनशालिनः तेभ्यःक्रियाप
राःश्रेष्ठास्तेभ्योप्यध्यात्मवित्तमाः १ नविद्ययाकेवलयातपसावापिपात्रता यत्रवृत्तमिमेचो
भेतद्धिपात्रंप्रकीर्तितं २ गोभूतिलहिरण्यादिपात्रेदातव्यमर्चितं नापात्रेविदुषाकिंचिदा
त्मनःश्रेयइच्छता ३ विद्यातपोभ्यांहीनेननतुग्राह्यःप्रतिग्रहः गृह्णन्प्रदातारमधोनय

११

22

त्यात्मानमेवच ४ दातव्यंत्रस्यहं पात्रे निमित्तेषु विशेषतः याचितेनापिदातव्यंश्रद्धापूतंतुशक्तितः
५ हेमशृंगीशफैरूप्यैः सुशीलावस्त्रसंयुता सकांस्यपात्रादातव्याक्षीरिणीगौःसदक्षिणा ६ दा
तास्याःस्वर्गमाप्नोतिपूर्वेणविधिनाददत् ७ वत्सरान्रोमसंमितान् कपिलांचेत्तारयतिभूयश्चा
सप्तमंकुलं ७ सवत्सरोमतुल्यानियुगान्युभयतोमुखी दातास्याःस्वर्गमाप्नोतिपूर्वेणविधिनाद
दत् ८ यावद्वत्सस्यपादौद्वौमुखंयोन्यांचदृश्यते तावद्गौःपृथिवीज्ञेयायावद्गर्भंनमुंचति ९
यथाकथंचित्दत्वागांधेनुंवाधेनुमेववा अरोगामपरिक्लिष्टांदातास्वर्गेमहीयते १० श्रांतसंवा
हनंरोगिपरिचर्यासुरार्चनं पादशौचंद्विजोच्छिष्टमार्जनंगोप्रदानवत् ११ भूदीपान्नवस्त्रांभ
स्तिलसर्पिःप्रतिश्रयान् नैवेशिकंस्वर्णधुर्यंदत्वास्वर्गेमहीयते १२ गृहधान्याभयोपानत्
छत्रमाल्यानुलेपनं यानंवृक्षंप्रियंशय्यांदत्वात्यंतसुखीभवेत् १३ सर्वधर्ममयंब्रह्मप्रदा

१२

नेभ्योधिकंयतः तद्दत्समवाप्नोति ब्रह्मलोकमविच्युतं १४ प्रतिग्रहसमर्थोपिनादत्तेयः प्रतिग्रहं
येलोकाः दानशीलानांसंतानाप्नोतिपुष्कलान् १५ कुशाः शाकंपयोमत्स्यागंधाः पुष्पंदधिक्षि
तिः मांसंशय्यासनंधानाः प्रत्याख्येयंनवारिच १६ अयाचिताहृतंग्राह्यमपिदुष्कृतकर्मणः
अन्यत्रकुलटाषंढपतितेभ्यस्तथाद्विषः १७ देवातिथ्यर्चनकृतेगुरुभृत्यार्थमेवच सर्वतःप्र
तिगृह्णीयादात्मवृत्त्यर्थमेवच १८ इतिदानप्रकरणं अमावास्याष्टकावृद्धिः कृष्णपक्षायनद्व
यं द्रव्यंब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः १९ व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोः श्राद्ध
प्रतिरुचिश्चैवश्राद्धकालाः प्रकीर्तिताः २० अग्र्याः सर्वेषुवेदेषुश्रोत्रियोब्रह्मविद्युवा वेदार्थवि
त्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णकः २१ स्वस्त्रीयऋत्विग्जामातृयाज्यश्वशुरमातुलाः त्रिणाचि
केतदौहित्रशिष्यसंबंधिबांधवाः २२ कर्मनिष्ठास्तपोनिष्ठापंचाग्निर्ब्रह्मचारिणः पितृमा
तृपराश्चैवब्राह्मणाः श्राद्धसंपदे २३ रोगीहीनातिरिक्तांगः काणः पौनर्भवस्तथा अवकी १२

भृतकाध्यापकक्लीबः कन्यादूष्यभिशस्तकः त्रिमधुकृपिशु
नीकुंडगोलौकुनखीश्यावदंतकः २४ मातापितृगुरुत्यागीकुंडालीवृषलात्मजः परपूर्वापतिस्तेनः कर्म
नःसोमविक्रयीपरविंदकः २५ मातापितृगुरुत्यागीकुंडालीवृषलात्मजः परपूर्वापतिस्तेनः कर्म
दुष्टाश्चनिंदिताः २६ निमंत्रयेत पूर्वेद्युब्राह्मणानात्मवान्शुचिः तैश्चापिसंयतैर्भाव्यंमनोवा
क्कायकर्मभिः २७ अपराह्णेसमभ्यर्च्यस्वागतेनागतांस्तुतान् पवित्रपाणिराचांतानासनेषू
पवेशयेत् २८ युग्मान्दैवेयथाशक्तिपित्र्येयुग्मांस्तथैवच परिश्रितेशुचौदेशेदक्षिणाप्रव
णेतथा २९ द्वौदैवेप्राक्त्रयःपित्र्येउदगेकैकमेववा मातामहानामप्येवंतंत्रंवावैश्वदेविकं
३० पाणिप्रक्षालनंदत्वाविष्टरार्थान्कुशानपि आवाहयेदनुज्ञातोविश्वेदेवास
इत्यृचा ३१ यवैरन्ववकीर्याथभाजनेसपवित्रके शंनोदेव्यापयःक्षिप्त्वायवोसीतियवां
स्तथा ३२ यादिव्याइतिमंत्रेणहस्तेत्वर्घ्यंविनिक्षिपेत् दत्वोदकंगंधमाल्यंधूपदीनसदीपकं
३३ अपसव्यंततःकृत्वापितृणामप्रदक्षिणं द्विगुणांस्तुकुशान्दत्वाह्युशंतस्त्वेत्यृचापि

१३

त्तृन् ३४ आवाह्यतदनुज्ञातोजपेदायंतुनस्ततः यवार्थास्तुतिलैःकार्याःकुर्यादर्घादिपूर्ववत्
३५ दत्वार्घंसंस्रवांस्तेषांपात्रेकृत्वाविधानतः पितृभ्यःस्थानमसीतिन्युब्जंपात्रंकरोत्सथा
३६ अग्नौकरिष्यन्नादायपृछत्यन्नंघृतप्लुतं कुरुष्वेत्यभ्यनुज्ञातोहुत्वाग्नौपितृयज्ञवत्
३७ हुतशेषंप्रदद्यात्तु भाजनेषु समाहितः यथालाभोपपन्नेषु रौप्येषु च विशे
षतः ३८ दत्वान्नंपृथिवीतेपात्रमितिपात्राभिमंत्रणं कृत्वेदंविष्णुरित्यन्नेद्विजांगुष्ठंनिवेशये
त् ३९ सव्याहृतिकगायत्रींमधुवाताइतित्र्यचं जप्त्वायथासुखंवाच्यंभुंजीरंस्तेपिवाग्यताः
४० अन्नमिष्टंहविष्यंचदद्यादक्रोधनोत्वरः आतृप्तेस्तुपवित्राणिजप्त्वापूर्ववज्जपेत्तथा
४१ अन्नमादायतृप्ताःस्थशेषंचैवानुमान्यच तदन्नंप्रकिरेद्भूमौदद्याच्चापःसकृत्स
कृत् ४२ सर्वमन्नमुपादायसतिलंदक्षिणामुखः उच्छिष्टसन्निधौपिंडान्दद्याद्वैपि
तृयज्ञवत् ४३ मातामहानामप्येवंदद्यादाचमनंततः स्वस्तिवाच्यंततःकुर्यादक्षय्यो

१३

दकमेवच ४४ दत्वाथदक्षिणांशक्त्यास्वधाकारमुदाहरेत् वाच्यतामित्यनुज्ञातः प्रकृतेभ्यःस्वधो
च्यतां ४५ ब्रूयुरस्तुस्वधेत्युक्ते भूमौसिंचेत्ततोजलं विश्वेदेवाश्चप्रीयंतां विप्रैश्चोक्तइदंजपेत्
४६ दातारोनोभिवर्द्धंतांवेदाःसंततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति ४७ इत्यु
क्त्वोक्त्वाप्रियावाचःप्रणिपत्यविसर्जयेत् वाजेवाजइतिप्रीतः पितृपूर्वंविसर्जयेत् ४८ यस्मिं
स्तुसंस्रवाःपूर्वमर्घ्यपात्रेनिवेशिताः पितृपात्रंतदुत्तानंकृत्वाविप्रान्विसर्जयेत् ४९ प्रदक्षि
णमनुव्रज्यभुंजीतपितृसेवितं ब्रह्मचारीभवेत्तांतुरजनींब्राह्मणैःसह ५० एवंप्रदक्षिणावृत्को
वृद्धौनांदीमुखान्पितॄन् यजेतदधिकर्कंधुमिश्रान्पिंडान्यवैःक्रियाः ५१ एकोद्दिष्टंदेवहीन
मेकार्घैकपवित्रकं आवाहनाग्नौकरणरहितंह्यपसव्यवत् ५२ उपतिष्ठतामक्षय्यस्थाने
विप्रविसर्जने अभिरम्यतामितिवदेद्ब्रूयुस्तेभिरताःसह ५३ गंधोदकतिलैर्युक्तंकुर्यात्पा स्म
त्रचतुष्टयं अर्घार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत् ५४ येसमानाइतिद्वाभ्यांशेषंपूर्ववि

२४

दाचरेत् एतत्सपिंडीकरणमेकोद्दिष्टं स्त्रिया अपि ५५ अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत्
तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे ५६ मृतेहनि तु कर्तव्यं प्रतिमासं तु वत्सरं प्रतिसंवत्सरं चै
वमाद्यमेकादशेहनि ५७ पिंडांस्तु गोजविप्रेभ्यो दद्यादग्नौ जलेपि वा प्रक्षिपेत्सत्सु विप्रेषु द्विजोच्छि
ष्टं न मार्जयेत् ५८ हविष्यान्नेन वै मासं पायसेन तु वत्सरं मात्स्यहारिणकौरभ्रशाकुनच्छागपा
र्षतैः ५९ ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं मासवृध्याभितृप्यंति दत्तैरिह पितामहाः ६०
खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च लोहामिषं महाशाकं मांसं वाध्रीणसस्य च ६१ यं
ददाति गयास्थश्च सर्वमानंत्यमश्नुते तथा वर्षात्रयोदश्यां मघासु च विशेषतः ६२ कन्यां कं
न्यावेदिनश्च पशून्वै सत्सुतानपि द्यूतं कृषिं वाणिज्यं द्विशफैकशफांस्तथा ६३ ब्रह्मवर्च
स्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा ६४ प्रति
पत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं शस्त्रेण तु हतायैव तेभ्यस्तत्र प्रदीयते ६५ स्वर्ग

१४

घपस्समो जश्च शौर्यं क्षेत्रं बलं तथा पुत्रं श्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभं ६६ प्रवृत्तचक्रतां
चैव वाणिज्यप्रभृतीनपि अरोगित्वं यशो वीतशोकतां परमां गतिं ६७ धनं वेदान्भिषक्सिद्धिं कु
प्यं गा अप्यजाविकं अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति ६८ कृत्तिकादिभरण्यंतं स का
मानाप्नुयादिमान् आस्तिकः श्रद्दधानश्च व्यपेतमदमत्सरः ६९ वसुरुद्रादितिसुताः पि
तरः श्राद्धदेवताः प्रीणयंति मनुष्याणां पितृन्श्राद्धेन तर्पिताः ७० आयुः प्रजां धनं वि
द्यां स्वर्गं मोक्षं सुखानि च प्रयच्छंति तथा राज्यं प्रीता न्हृणां पितामहाः ७१ इति श्राद्धप्रक
रणं विनायकः कर्मविघ्नसिध्यर्थं विनियोजितः गणानामाधिपत्ये च रुद्रेण ब्रह्मणा त
था ७२ तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत स्वप्नेवगाहतेत्यर्थं जलं मुंडांश्च पश्यति
७३ काषायवाससश्चैव क्रव्यादांश्चाधिरोहति अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते ७४
७४ व्रजन्नपि तथात्मानं मन्यतेनुगतं परैः विमना विफलारंभः संसीदत्यनिमित्ततः ७५

१५

तेनोपसृष्टो लभते न राज्यं राजनंदनः कुमारी च न भर्तारमपत्यं गर्भमंगना ७६ आचार्यत्वं श्रोत्रि
यश्च न शिष्योध्ययनं तथा वणिक् लाभं च नाप्नोति कृषिं वापि कृषीवलः ७७ स्नपनं तस्य कर्त
व्यं पुण्येह्नि विधिपूर्वकं गौरसर्षपकल्केन साज्येनोत्सादितस्य च ७८ सर्वौषधैः सर्वगंधैर्वि
लिप्तशिरसस्तथा भद्रासनोपविष्टस्य स्वस्ति वाच्या द्विजाः शुभाः ७९ अश्वस्थानाद्गजस्था
नाद्वल्मीकात्संगमाद्ध्रदात् मृत्तिकां रोचनां गंधान् गुग्गुलं चाप्सु निक्षिपेत् ८० या आहृता ह्येक
वर्णैः श्चतुर्भिः कलशैर्ह्रदात् चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः ८१ सहस्राक्षं शत
धारमृषिभिः पावनं कृतं तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते ८२ भगं ते वरुणो राजा
भगं सूर्यो बृहस्पतिः भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः ८३ यत्ते केशेषु दौर्भाग्यं सीमं
ते यच्च मूर्द्धनि ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु सर्वदा ८४ स्नातस्य सार्षपं तैलं स्रुवेणौ
दुंबरेण तु जुहुयान्मूर्द्धनि कुशान् सव्येन परिगृह्य तु ८५ मितश्च संमितश्चैव तथा शा १५

लकटंकटौ कुष्मांडाराजपुत्रश्चेत्यंते स्वाहासमन्वितैः ८६ नामभिर्बलिमंत्रैश्च नमस्कारसम
न्वितैः दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः ८७ कृताकृतांस्तंडुलांश्च पललौदनमेव
च मत्स्यान्पक्कांस्तथैवामान्मांसमेतावदेव तु ८८ पुष्पं चित्रं सुगंधं च सुरां च त्रिविधामपि
मूलकं पूरिकापूपांस्तथैवोंडेरकास्रजः ८९ दध्यन्नं पायसं चैव गुडपिष्टं समोदकं एतान्
सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः ९० विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां दूर्वास
र्षपपुष्पाणां दत्वार्घं पूर्णमंजलिं ९१ रूपं देहि यशो देहि भगं भगवति देहि मे पुत्रान्देहि ध
नं देहि सर्वान्कामांश्च देहि मे ९२ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ब्राह्मणान्भो
जयेद्दद्याद्वस्त्रयुग्मं गुरोरपि ९३ एवं विनायकं पूज्य ग्रहांश्चैव विधानतः कर्मणां फल
माप्नोति श्रियं चाप्नोत्यनुत्तमां ९४ आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा महाग
णपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् ९५ इति गणपतिकल्पः श्रीकामः शांतिका

मोवाग्रहयज्ञंसमाचरेत् वृष्यायुःपुष्टिकामोवातथैवाभिचरंन्नपि ९६ सूर्यःसोमो
महीपुत्रःसोमपुत्रोबृहस्पतिः शुक्रःशनैश्चरोराहुःकेतुश्चैतेग्रहाःस्मृताः ९७ ताम्र
कात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ रजतादयसःसीसात्कांस्यात्कार्याग्रहाः
क्रमात् ९८ स्ववर्णैर्वापटेलेख्यागंधैर्मंडलकेषुवा यथावर्णंप्रदेयानिवासांसिकु
सुमानिच ९९ गंधाश्चवलयश्चैवधूपोदेयश्चगुग्गुलः कर्तव्यामंत्रवंतश्चचरवः
प्रतिदैवतं ३०० आकृष्णेनइमंदेवाअग्निर्मूर्द्धादिवःककुत् उद्बुध्यस्वेतिचऋचो
यथासंख्यप्रकीर्तिताः बृहस्पतेअतियदर्यस्तथैवान्नात्परिस्रुतः शंनोदेवीस्तथाकां
डात्केतुंकृण्वन्निमास्तथा २ अर्कःपलाशःखदिरस्त्वपामार्गोथपिंपलः उदुंबरःशमी
दूर्वाःकुशाश्चसमिधःक्रमात् ३ एकैकस्यत्वष्टशतमष्टाविंशतिरेववा होतव्या
मधुसर्पिर्भ्यांदध्नाक्षीरेणवापुनः ४ गुडौदनंपायसंचहविष्यंक्षीरषाष्टिके दध्यो

दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च ५ दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः शक्तितोपि
यथालाभं सत्कृत्य विधिपूर्वकं ६ धेनुः शंखस्तथानड्वान्हेम वासो हयः क्रमात् कृष्णा गौराय
संछाग एता वै दक्षिणाः स्मृताः ७ यश्च यस्य यदा दुष्टः स तं यत्नेन पूजयेत् ब्रह्मणैषां वरो दत्तः पूजि
ताः पूजयिष्यथ ८ ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च भावाभावौ च जगतस्तस्मा
त्पूज्यतमा ग्रहाः ९ ग्रहाणामिदमातिथ्यं कुर्यात्संवत्सरादपि आरोग्यबलसंपन्नो जीवे
त्स शरदः शतं १० इति ग्रहशांतिः महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः विनीतः सत्व
संपन्नः कुलीनः सत्यवाक् शुचिः ११ अदीर्घसूत्रः स्मृतिमानक्षुद्रोपरुष
स्तथा धार्मिकोव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् १२ स्वरंध्रगोप्तान्वीक्षिक्यां दंडिनी
त्यां तथैव च विनीतस्त्वथ वार्तायां त्रैय्यां चैव नराधिपः १३ स मंत्रिणः प्रकुर्वीत प्राज्ञा
न्मौलान्नरान्स्थिरान्शुचीन् तैः सार्धं चिंतयेद्राज्यं विप्रेणाथ ततः स्वयं १४ पुरोहितं

२७

चकुर्वतिदैदेवज्ञमुदितोदितं रक्षिनीत्यांचकुशलमथर्वांगिरसेतथा १५ श्रौतस्मार्तक्रियाहेतोर्वृणुया
देवचर्त्विजः यज्ञांश्चैवप्रकुर्वीतविधिवद्भूरिदक्षिणान् १६ भोगांश्चदद्याद्विप्रेभ्योवस्तूनिविवि
धानिच अक्षयोयंनिधीराज्ञांयद्विप्रेषूपपादितो १७ अस्कन्नमव्यथंचैवप्रायश्चित्तैरदूषितं
अग्नेःसकाशाद्विप्राग्नौहुतंश्रेष्ठमिहोच्यते १८ अलब्धमीहेद्धर्मेणालब्धंयत्नेनपाल
येत् पालितंवर्द्धयेन्नीत्यावृद्धंपात्रेषुनिःक्षिपेत् १९ पटेवाताम्रपट्टेवास्वमुद्रोपरिचिह्नितं
अभिलेख्यात्मनोवंश्यानात्मानंचमहीपतिः २० प्रतिग्रहपरीमाणंदानच्छेदोपवर्णनं स्वह
स्तकालसंपन्नंशासनंकारयेत्स्थिरं २१ रम्यंपशव्यमाजीव्यंजांगलंदेशमावसेत्
तत्रदुर्गाणिकुर्वीतजनकोशात्मगुप्तये २२ तत्रतत्रचनिष्णातानध्यक्षान्कुशलान्शुची
न् प्रकुर्यादायकर्मांतिव्ययकर्मसुचोद्यतान् २३ नातःपरतरोधर्मोन्रृपाणांयद्रणार्जि
तं विप्रेभ्योदीयतेद्रव्यंप्रजाभ्यश्चाभयंसदा २४ येआहवेषुवध्यंतेभूम्यर्थमपराङ्मुखाः

२७

अकूरैरायुधेर्मांतिनेस्वर्गयोगिनोयथा २५ पदानिकृतुतुल्यानिभग्नेष्वविनिवर्तिनां राजासुकृतमादत्ते

हतानांविपलायिनां २६ नवाहं वादिनंक्लीबंनिर्हेतिंपरसंगतं नहन्याद्विनिरत्नंचयुद्धेप्रेक्षणकारकं

२७ कृतरक्षः समुत्थायपश्येदायव्ययौस्वयं व्यवहारांस्ततोदृष्ट्वास्नात्वाभुंजीतकामतः २८ हि

रण्यंव्याप्ततानीतंभांडारेगोपुनिक्षिपेत् पश्येच्चारांस्ततोदूतान्प्रेषयेन्मंत्रिसंगतः २९ ततःस्वैरवि

हारीस्यान्मंत्रिभिर्वासमागतः बलानांदर्शनंकृत्वासेनान्यासहचिंतयेत् ३० संध्यामुपास्यशृणु

याच्चाराणांगूढभाषितं गीतनृत्यैश्चभुंजीतपठेत्स्वाध्यायमेवच ३१ संविशेत्तूर्यघोषेणप्रतिबु

ध्येत्तथैवच शास्त्राणिचिंतयेद्बुध्वासर्वकर्तव्यतांतथा ३२ प्रेषयेच्चततश्चारान्स्वेष्वन्येषुचसा

दरात् ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनंदितः ३३ दृष्ट्वाज्योतिर्विदोवैद्यान्दद्याद्गाः

कांचनंमहीं नैवेशिकानिचतथाश्रोत्रियाणांगृहाणिच ३४ ब्राह्मणेषुक्षमीस्निग्धेष्वजिह्मः

क्रोधनोरिषु स्याद्राजाभृत्यवर्गेषुप्रजासुचयथापिता ३५ पुंण्यात्षड्भागमादत्तेन्यायेनपरिपा

१८

लयन् सर्वदादनाधिकंयस्मात्प्रजानांपरिपालयन्नं ३६ चारतस्करदुर्वृत्तमहासाहसिकादिभिः पीड्य
मानाः प्रजारक्ष्यास्तुकायस्थेभ्यश्चविशेषतः ३७ अरक्ष्यमाणाः कुर्वंतियत्किंचित्किल्बिषंप्रजाः तस्मात्तुनृप
तेरर्धंयस्माद्गृह्णात्यसौकरान् ३८ येराष्ट्राधिकृतास्तेषांचारैर्ज्ञात्वाविचेष्टितं साधून्संमानयेद्राजा
विपरीतांश्चघातयेत् ३९ उत्कोचजीविनोद्रव्यहीनान्कृत्वाविवासयेत् सदानमानसत्कारैःश्रोत्रि
यान्वासयेत्सदा ४० अंन्यायेननृपोराष्ट्रात्स्वकोशंयोविवर्धयेत् सोचिराद्विगतश्रीकोनाशमेति
सबांधवः ४१ प्रजापीडनसंतापात्समुद्भूतोहुताशनः राज्ञःकुलंश्रियंप्राणानिदग्ध्वानतिवर्तते ४२
यएवंतुनृपतेर्धर्मःस्वराष्ट्रपरिपालने तमेवकृत्स्नमाप्नोतिपरराष्ट्रंवशंनयन् ४३ देशेयस्मिन्नृप
आचारोव्यवहारःकुलस्थितिः तथैवपरिपाल्योसौयदावशमुपागतः ४४ मंत्रमूलंयतोराज्यमतो
मंत्रंसुरक्षितं कुर्याद्यथास्यनविदुःकर्मणामाफलोदयात् ४५ अरिर्मित्रमुदासीनोनंतरस्तत्परः
परः क्रमशोमंडलंचिंत्यंसामादिभिरुपक्रमैः ४६ उपायाःसामदानंचभेदोदंडस्तथैवच सम्य
क्प्रयुक्ताःसिध्येयुर्दंडस्त्वगतिकागतिः ४७ संधिंचविग्रहंयानमासनंसंश्रयंतथा द्वैधीभावं

२८

गुणानेतान्यथावसरि कल्पयेत् ४८ यदास्यस्याद्गुणोपेतं परराष्ट्रं तदा व्रजेत् परश्च हीन आत्मा च हृष्टवा
हनपूरुषः ४९ दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकं ५० केचिद्दै
वात्स्वभावाच्च कालात्पुरुषकारतः संयोगे केचिदिच्छन्ति फलं कुशलबुद्धयः ५१ यथा ह्येकेन चक्रेण
रथस्य न गतिर्भवेत् एवं पुरुषकारेण विना दैवं न सिध्यति ५२ हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा
यतः अतो यतेत तत्प्राप्त्यै रक्षेत्सत्यं समाहितः ५३ स्वाम्यमात्यजनो दुर्गं कोशो दंडस्तथैव च मित्राण्ये
ताः प्रकृतयो राज्यं सप्तांगमुच्यते ५४ तदवाप्य नृपो दंडं दुर्वृत्तेषु निपातयेत् धर्मो हि दंडरूपेण ब्र
ह्मणा निर्मितः पुरा ५५ स नेतुं न्यायतः शक्यो लुब्धेनाकृतबुद्धिना सत्यसंधेन शुचिना सुसहा
येन धीमता ५६ यथाशास्त्रं प्रयुक्तः सन् सदेवासुरमानुषं जगदानंदयेत्सर्वमन्यथा तत्प्रकोप
येत् ५७ अधर्मदंडनं स्वर्गकीर्तिलोकविनाशनं सम्यक्तु दंडनं राज्ञः स्वर्गकीर्तिजयावहं ५८
अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा नादंड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात् ५९
यो दंड्यान् दंडयेद्राजा सम्यग्वध्यांश्च घातयेत् इष्टं स्यात्क्रतुभिस्तेन समाप्तवरदक्षिणैः ६० इ

इति संचिंत्य नृपतिः क्रतुतुल्यं फलं पृथक् व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोन्वहं ६१ कुला
निजातिः श्रेणीश्च गणान्जानपदानपि स्वधर्माच्चलितान्राजा विनीय स्थापयेत्पथि ६२ अथ
दंडमाह जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं तेष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ६३

गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश ६४ पलं सुव
र्णाश्चत्वारः पंच वापि प्रकीर्तितं द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते ६५ शतमानं तु दश
भिर्धरणैः पलमेव तु निष्कं सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः ६६ साशीतिः पणसाहस्रो
दंड उत्तमसाहसः तदर्धं मध्यमः प्रोक्तस्तदर्धमधमः स्मृतः ६७ धिग्दंडस्त्वथ वाग्दंडो धनदं
डो वधस्तथा योज्या व्यस्ताः समस्ता वाप्यपराधवशादिमे ६८ ज्ञात्वापराधं देशं च कालं बल
मथापि वा वयः कर्म च वित्तं च दंडं दंड्येषु पातयेत् ६९ इति राजधर्मप्रकरणं इति याज्ञवल्की
ये धर्मशास्त्रे प्रथमोध्यायः व्यवहारान्नृपः पश्येत् विद्वद्भिर्ब्राह्मणैः सह धर्मशास्त्रा

नुसारेणक्रोधलोभविवर्जितः ७० श्रुताध्ययनसंपन्नाधर्मज्ञाः सत्यवादिनः राज्ञासभासदः कार्याःरिपौ
मित्रेचयेसमाः ७१ अपश्यताकार्यवशाद्व्यवहारान्नृपेणतु सभ्यैःसहनियोक्तव्योब्राह्मणः सर्वध
र्मवित् ७२ रागाल्लोभाद्भयाद्वापिस्मृत्यपेतादिकारिणः सभ्याःपृथक्पृथग्दंड्या विवादाद्द्विगुणंद
मं ४ ७३ स्मृत्याचारव्यपेतेनमार्गेणाधर्षितः परैः आवेदयतिचेद्राज्ञेव्यवहारपदंहितत् ५ ७४ प्र
त्यर्थिनोग्रतोलेख्यंयथावेदितमर्थिना समामासतदर्धाहर्नामजात्यादिचिह्नितं ६ ७५ श्रुतार्थस्यो
त्तरंलेख्यंपूर्वावेदकसंनिधौ ततोर्थीलेखयेत्सद्यःप्रतिज्ञातार्थसाधनं ७ ७६ तत्सिद्धौसिद्धिमा
प्नोतिविपरीतमतोन्यथा चतुष्पाद्व्यवहारोयंविवादेषूपदर्शितः ८ ७७ इतिव्यवहारसाधारणमा
त्रका अभियोगमनिस्तीर्य नैनंप्रत्यभियोजयेत् अभियुक्तंचनान्येननोक्तंविप्रकृतिंनयेत् ९ ७८
कुर्यात्प्रत्यभियोगंतुकलहेसाहसेषुच उभयोःप्रतिभूर्ग्राह्यः समर्थःकार्यनिर्णये १० ७९ नि
ह्नवेभावितोदद्याद्धनंराज्ञेचतत्समं मिथ्याभियोगीद्विगुणमभियोगाद्धनंवहेत् ११ ८० साहसस्ते

यपारुष्यगोभिशापासयेस्त्रियां विवादयेत्स्वयं घएव कालोन्यत्रेछयास्मृतः १२ ८१ देशाद्देशांतरं
२० यातिसृक्किणीपरिलेढिच ललाटं स्विद्यते चास्यमुखं वैवर्ण्यमेति च १३ ८२ परिशुष्यत्स्खल
द्वाक्यो विरुद्धं बहुभाषते वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि १४ ८३ स्वभावाद्वि
कृतिं गच्छेन्मनोवाक्कायकर्मभिः अभियोगे च साक्ष्ये वा सदुष्टः परिकीर्तितः १५ ८४ संदिग्धा
र्थं स्वतंत्रो यः साधयेद्यश्च निःपतेत् न चाहूतो वदेत्किंचिद्धीनो दंड्यश्च स स्मृतः १६ ८५ साक्षि
षूभयतः सत्सु साक्षिणः पूर्ववादिनः पूर्वपक्षेधरीभूते भवंत्युत्तरवादिनः १७ ८६ सपणश्चेद्विवा
दः स्यात्तत्र हीनं तु दापयेत् दंडं च स्वपणं चैव धनिने धनमेव च १८ ८७ छलं निरस्य भूतेन व्यवहा
रान्नयेन्नृपः भूतमप्यनुपन्नं यस्तं हीयते व्यवहारतः १९ ८८ निह्नुते लिखितं नैकमेकदेशावि २०
भावितः दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः २० ८९ स्मृत्योर्विरोधे न्यायस्तु बलवा

नृव्यवहारतः अर्थशास्त्रात्तु बलवत्धर्मशास्त्रमितिस्थितिः २१ ९० प्रमाणंलिखितंभुक्तिः साक्षि
णश्चेतिकीर्तितं एषामन्यतमाभावेदिव्यान्यतममुच्यते २२ ९१ सर्वेष्वर्थविवादेषुबलवत्युत्तराक्रि
या आधौप्रतिग्रहेक्रीतेपूर्वातुबलवत्तरा २३ ९२ पश्यतोब्रुवतोभूमेर्हानिर्विंशतिवार्षिकी प
रेणभुज्यमानायाधनस्यदशवार्षिकी २४ ९३ आधिसीमोपनिक्षेपजडबालधनैर्विना तथोपनि
धिराजस्त्रीश्रोत्रियाणांधनैरपि २५ ९४ आध्यादीनांविहर्तारंधनिनेदापयेद्धनं दंडंचतत्समंराज्ञे
शक्त्यपेक्षमथापिवा २६ ९५ आगमोभ्यधिकोभोगाद्विनापूर्वक्रमागतात् आग
मेपिबलंनैवभुक्तिस्तोकापियत्रनो २७ ९६ आगमस्तुकृतोयेनसोभियुक्तस्तमुद्धरेत् नतत्सु
तस्तत्सुतोवाभुक्तिस्तत्रगरीयसी २८ ९७ योभियुक्तःपरेतस्यात्तस्यरिक्थीतमुद्धरेत् नतत्रका
रणंभुक्तिरागमेनविनाकृता २९ ९८ नृपेणाधिगताःपूगाःश्रेण्योथकुलानिच पूर्वंपूर्वंगुरु

ज्ञेयंव्यवहारविधौन्यथां ३० ९९ बलोपधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत् स्त्रीनक्तमंतरागारबहिःश
त्रुकृतांस्तथा ३१ ४०० मत्तोन्मत्तार्तव्यसनिबालभीतादियोजितः असंबद्धकृतश्चैवव्यवहारोनसिध्य
२२
ति ३२ ४०१ प्रनष्टाधिगतंदेयंनृपेणधनिनेधनं विभावयेन्नचेल्लिंगैस्तत्समंदंडमर्हति ३३ ४०२ राज
लब्ध्वानिधिंदद्याद्द्विजेभ्योर्द्धं द्विजः पुनः विद्वानशेषमादद्यात्ससर्वस्यप्रभुर्यतः ३४
ह
४०३ इतरेणनिधौलब्धेराजाषष्ठांशमाहरेत् अनिवेदितविज्ञातोदाप्यस्तंदंडमेवच ३५ ४०४ दे
यंचौरहृतंद्रव्यंराजाजानपदायतु अददद्धिसमाप्नोतिकिल्बिषंयस्यतस्यतत् ३६ ४०५ इत्यसाधा
रणअबंधकेमात्का अशीतिभागोवृद्धिस्यान्मासिमासिसबंधके वर्णक्रमाच्छतंद्वित्रिचतुःपंच
कमन्यथा ३७ ४०६ कांतारगास्तुदशकंसामुद्राविंशकंशतं दद्युर्वास्वकृतांवृद्धिंसर्वेसर्वासुजा
२२
तिषु ३८ ४०७ संततिस्तुपशुस्त्रीणांरसस्याष्टगुणापरा वस्त्रधान्यहिरण्यानांचतुस्त्रिद्विगुणा

तथा ३९ ४० प्रपन्नंसाधयंनर्थंनवाच्योनृपतेर्भवेत् साध्यमानोनृपंगच्छेद्दंड्योदाप्यश्चतद्धनं ४०

४०९ गृहीतानुक्रमाद्दाप्योधनिनामधमर्णकः दत्वातुब्राह्मणायेवनृपतेस्तदनंतरं ४१ ४१०

राज्ञाधमर्णिकोदाप्यःसाधिताद्दशकंशतं पंचकंतुशतंदाप्यः १ प्राप्तार्थोह्युत्तमर्णिकः ४२ ११

हीनजातिंपरिक्षीणंऋणार्थंकर्मकारयेत् ब्राह्मणस्तुपरिक्षीणःशनैर्दाप्योयथोदयं ४४ १२

दीयमानंनगृह्णातिप्रयुक्तंयस्वकंधनं मध्यस्थस्थापितंतत्स्याद्वर्धतेनततःपरं ४५ १३ अ

विभक्तैःकुटुंबार्थेयदृणंतुकृतंभवेत् दद्युस्तद्रिक्थिनःप्रेतेप्रोषितेवाकुटुंबिनि ४६ ४१४

नयोषित्पतिपुत्राभ्यांनपुत्रेणकृतंपिता दद्यादृतेकुटुंबार्थान्नपतिःस्त्रीकृतंतथा ४७ १५

सुराकामद्यूतकृतंदंडशुल्कावशिष्टकं वृथादानंतथैवेहपुत्रोदद्यान्नपैतृकं ४८ ४१६ गोप

शौंडिकशैलूषरजकव्याधयोषितां ऋणंदद्यात्पतिस्तेषांयस्माद्वृत्तिस्तदाश्रया ४९ ४१७ प्र

तिपन्नंस्त्रियादेयंप्रत्यावासहयत्कृतं स्वयंकृतंवायदृणंनान्यत्स्त्रीदातुमर्हति ५० ४१८

२२

पितरिप्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभाविते ५१ ४१९ रिक्थग्रा
हऋणंदाप्यो योषिद्ग्राहस्तथैव च पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः ५१ ४२० भ्रातृणामथ
दंपत्योः पितुः पुत्रस्य चैव हि प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतं ५२ ४२१ इति ऋणदानप्रक
रणं दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ५३ ४२२ दे
दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः ५४ ४२३ बहवः
हवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनं एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ५५ ४२४ प्र
तिभूर्दापितो यस्तु प्रकाशं धनिनो धनं द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ५६ ४२५ सं
ततिस्त्रीपशुष्वेव धान्यं त्रिगुणमेव च वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा ५७ ४२६ इ
ति प्रतिभूप्रकरणं आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते काले कालकृतो नश्येत्फलभोग्यो न नश्यति ५८ ४२७ गोप्याधिभोगे नो वृद्धिः सोपकारे यहापिते नष्टो देयो विनष्ट
भोग्यो न नश्यति ५८ ४२७ गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते नष्टो देयो विनष्ट २२

श्चेद्देवराजकृताद्दृते ५९ ४२८ आधेः स्वीकरणात्सिद्धिरक्ष्यमाणोप्यसारतां यातश्चेदन्यआधे
योधनभाग्वाधानीभवेत् ६० ४२९ चरित्रबंधककृतंसवृध्यादापयेद्धनं सत्यंकारकृतंद्रव्यंद्वि
गुणंप्रतिदापयेत् ६१ ४३० उपस्थितस्यमोक्तव्यआधिस्तेनोन्यथाभवेत् प्रयोजकेसतिधनंकु
लेन्यस्याधिमाप्नुयात् ६२ ४३१ तत्कालकृतमूल्योवातत्रतिष्ठेदवृद्धिकः विनाधारणिकाद्वापि
विक्रिणीतससाक्षिकं ६३ ४३२ यदातुद्विगुणीभूतमृणमाधौतदाखलु मोच्यआधिस्तदुत्पन्ने
प्रविष्टेद्विगुणेधने ६४ ४३३ इतिऋणादानप्रकरणं वासनस्थमनाख्यायहस्तेन्यस्ययदर्प्य
ते द्रव्यंतदोपनिधिकंप्रतिदेयंतथैवतत् ६५ ४३४ नदाप्योपहृतंतत्तुराजदैविकतस्करैः भ्रे
षश्चेन्मागितेदत्तेदाप्योदंडंचतत्समं ६६ ४३५ आजीवन्स्वेछयादंड्योदाप्यस्तंचापिसोदयं
याचितान्वाहितंन्यासनिक्षेपादिष्वयंविधिः ६७ ४३६ इतिनिक्षेपविधिः तपस्विनोदानशी
लाः कुलीनाः सत्यवादिनः धर्मप्रधाना ऋजवः पुत्रवंतोधनान्विताः ६८ ४३७ त्र्यवराः सा

क्षियो ज्ञेयाः श्रौतस्मार्तक्रियापराः यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ६९ ४३८ स्त्रीबा
२३ लवृद्धकितवमत्तोन्मत्ताभिशस्तकाः रंगावतारिपाखंडीकूटकृद्विकलेंद्रियाः ७० ४३९ प
तितार्थसंबंधिसहायरिपुतस्कराः साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः ७१ ४४०
उभयानुमतः साक्षी भवत्येकोपि धर्मवित् सर्वः संग्रहणे साक्षी चौर्यपारुष्यसाहसे ७२ ४४१
साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ये पातककृतां लोका महापातकिनां तथा ७३ ४४२
अग्निदानां च ये लोका ये च स्त्रीबालघातिनां तान्सर्वान्समवाप्नोति यः साक्ष्यमनृतं वदेत् ७४
४४३ सुकृतं यत्त्वया किंचिज्जन्मांतरशतैः कृतं तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ७५ ४४४
अब्रुवन्हि नरः साक्ष्यमृणं सदशबंधकं राज्ञा सर्वं प्रदाप्यः स्यात्षट्चत्वारिंशकेऽहनि ७६ ४४५
न ददाति हि यः साक्ष्यं जानन्नपि नराधमः स कूटसाक्षिणां पापैस्तुल्यो दंडेन चैव हि ७७ ४४६
द्वैधे बहूनां वचनं समेषु गुणिनां तथा गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः ७८ ४४७ यस्यो २३

ब्रुःसाक्षिणःसत्यांप्रतिज्ञांसजयीभवेत् अन्यथावादिनोयस्यध्रुवस्तस्यपराजयः ७९ ४४८ उक्तेपि
साक्षिभिःसाक्ष्येयद्यन्येगुणवत्तमाः द्विगुणावान्यथाब्रूयुःकूटाःस्युःपूर्वसाक्षिणः ८० ४४९ पृथक्
पृथग्दंडनीयाःकूटकृत्साक्षिणस्तथा विवादाद्द्विगुणंदंडंविवास्योब्राह्मणःस्मृतः ८१ ४५०
यःसाक्ष्यंश्रावितोन्येभ्योनिह्नुतेतत्तमोवृतः सदाप्योष्टगुणंदंडंब्राह्मणंतुविवासयेत् ८२ ४५१ व
र्णिनांहिवधोयत्रतत्रसाक्ष्यनृतंवदेत् तत्पावनायनिर्वाप्यश्चरुःसारस्वतोद्विजैः ८३ ४५२ इ
तिसाक्षिप्रकरणं यःकश्चिदर्थोनिष्णातःस्वरुच्यातुपरस्परं लेख्यंतुसाक्षिमत्कार्यंतस्मिन्न
धनिकपूर्वकं ८४ ४५३ समामासतदर्धाहर्नामजातिस्वगोत्रकैः सब्रह्मचारिकात्मीयपितृ
नामादिचिह्नितं ८५ ४५४ समाप्तेर्थेऋणीनामस्वहस्तेननिवेशयेत् मतंमेमकपुत्रस्य
यदत्रोपरिलेखितं ८६ ४५५ साक्षिणश्चस्वहस्तेनपितृनामकपूर्वकं अत्राहममुकःसाक्षी
लिखेयुरितितेसमाः ८७ ४५६ उभयाभ्यर्थितेनैवतन्मयाह्यमुकसूनुना लिखितंह्यमुकेनै

२४

विनापिसाक्षिभिर्लेख्यंस्वहस्तलिखितंतुयत् सत्प्रमाणंस्मृ
तल्लेखकोंतेनतोलिखेत् ८८ ४५७ ऋणंलेख्यकृतंदेयंपुरुषैस्त्रिभिरेवतु आधिस्तुभुज्यते
तंसर्वंवलोपधिकृताहृते ८९ ४५८ देशांतरस्थेदुर्लेख्येनष्टोन्मृष्टेहृतेतथा भिन्नेदग्धेथवाछि
नावधावत्सन्नप्रदीयते ९० ४५९ संदिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः यु
न्नेलेख्यमन्यत्तुकारयेत् ९१ ४६० लेख्यस्यपृष्ठेभिलिखेत् दत्वादत्वाणि
क्तिप्राप्तिक्रियाचिह्नसंबंधागमहेतुभिः ९२ ४६१ दत्वर्णंपाटयेल्लेख्यंशुध्येवान्यत्तु
कोधनं धनीवोपगतंदद्यात्स्वहस्तपरिचिह्नितं ९३ ४६२ इतिलेख्यप्रकरणं तुला
कारयेत् साक्षिमत्त्वभवेद्यद्दातद्दातव्यंससाक्षिकं ९४ ४६३ महाभियोगेष्वेतानिशीर्षकस्थेभियोक्तरि ९५
ग्न्यापोविषंकोशोदिव्यानीहविशुद्धये विनापिशीर्षकात्कुर्यान्नृपद्रोहे
४६४ रुच्यावान्यततःकुर्यादितरोवर्तयेच्छिरः सचैलंस्नातमाहूयसूर्योदयउपोषितं कारयेत्सर्वदिव्या
ग्निपातके ९६ ४६५

२४

निन्दपब्राह्मणसंनिधौ ९७ ४६६ तुलास्त्रीबालवृद्धांधपंगुब्राह्मणरोगिणां अग्निर्जलं
वाशूद्रस्ययवाः सप्तविषस्यवा ९८ ४६७ नासहस्राद्धरेत्फालं नविषं नतुलां तथा नृपा
र्थेष्वभिशापेचवहेयुः शुचयः सदा ९९ ४६८ तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रि
तः प्रतिमानसमीभूतो लेखांकृत्वावतारितः १०० ४६९ त्वंतुले सत्यधामासि पुरादेवैर्विनि
र्मिता तत्सत्यंवदकल्याणि संशयान्मांविमोचय १ ४७० यद्यस्मिपापकृन्मातस्ततोमां
त्वमधोनय शुद्धश्चेद्गमयोर्ध्वंमांतुलामित्यभिमंत्रयेत् २ ४७१ इतिधटविधिः करौविमृ
दितव्रीहेर्लक्षयित्वा ततोन्यसेत् सप्ताश्वत्थस्यपर्णानि तावत्सूत्रेणवेष्टयेत् ३ ४७२ त्वम
ग्नेसर्वभूतानामंतश्चरसिपावक साक्षिवत्पुण्यपापेभ्यो ब्रूहिसत्यंकवेमम ४ ४७३ तस्येत्यु
क्तवतो लोहं पंचाशत्पलिकंसमं अग्निवर्णंन्यसेत्पिंडं हस्तयोरुभयोरपि ५ ४७४ सतमादाय

२५

सप्तैवमंडलानिशनैर्व्रजेत् षोडशांगुलिकं ज्ञेयंमंडलंतावदंतरं ६ ४७५ मुक्त्वाग्निंमर्दितव्रीहिरदग्धःशुद्धि
माप्नुयात् अंतरापतितेपिंडे संदेहेवापुनर्हरेत् ७ ४७६ सत्येनमाभिरक्षस्त्वंवरुणेत्यभिशाप्यकं ना
भिदघ्नोदकस्थस्यगृहीत्वोरूपलंविशेत् ८ ४७७ समकालमिषुंमुक्तमानीयान्योजवीनरः गतेत
स्मिन्निमग्नांगंपश्येच्चेच्छुद्धिमाप्नुयात् ९ ४७८ त्वंविषब्रह्मणःपुत्रःसत्यधर्मेव्यवस्थितः त्रायस्वा
स्मादभीशापात्सत्येनभवमेमृतं १० ४७९ एवमुक्त्वाविषंशार्ङ्गंभक्षयेद्धिमशैलजं यस्यवेगैर्विना
जीर्येच्छुद्धिंतस्यविनिर्दिशेत् ११ ४८० देवानुग्रान्समभ्यर्च्यतत्स्नानोदकमाहरेत् संस्नाप्यपा
ययेत्तस्मात्जलात्प्रसृतित्रयं १२ ४८१ अर्वाक्चतुर्दशादह्नोयस्यनोराजदैविकं व्यसनंजायते
घोरंसशुद्धःस्यान्नसंशयः १३ ४८२ इतिकोशविधिः विभागंचेत्पिताकुर्यादिच्छयाविभजे
त्सुतान् ज्येष्ठंवाश्रेष्ठभागेनसर्वेवास्युःसमांशिनः १४ ४८३ यदिकुर्यात्समानंशान्पत्न्यःकार्याःस
मांशिकाः नदत्तंस्त्रीधनंयासांभर्त्रावाश्वशुरेणवा १५ ४८४ शक्तस्यानीहमानस्यकिंचिद्दत्वा

२५

पृथक् क्रिया न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः १६ ४८५ विभजेरन्सुताः पित्रोरूर्ध्वमृ
क्थमृणं समं मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेन्वयः १७ ४८६ पितृद्रव्याविरोधेन यदन्यत्स्वय
मर्जितं मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् १८ ४८७ क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च १९ ४८८ सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः
अनेकपितृकाणां तु पितृतो भागकल्पना २० ४८९ भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा त
त्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि २१ ४९० विभक्तेषु सुतो जातः सवर्णायां विभागभाक् दृ
श्याद्वा तद्विभागः स्यादायव्ययविशोधितात् २२ ४९२ पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् पि
तुरूर्ध्वं विभजतां माताप्यंशं समं हरेत् २३ ४९२ असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः
भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं २४ ४९३ चतुस्त्रिद्व्येकभागास्युर्वर्णशो ब्राह्मण

२६

त्मजाः क्षत्रजास्त्रिद्व्येकभागा विड्जास्त्वेकभागिनः २५ ४९४ अन्योन्यापहृतं द्रव्यं विभक्तैर्यत्तु दृश्य
ते तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः २६ ४९५ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्य
सौ रिक्थी पिंडदाता च धर्मतः २७ ४९६ औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः क्षेत्रजः क्षेत्रजाजा
तस्तु सगोत्रेणेतरेण वा २८ ४९७ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः कानीनः कन्यकाजा
तो मातामहसुतो मतः २९ ४९८ अक्षतायां क्षतायां वा जातः पौनर्भवस्सुतः दद्यान्माता पिता वा यं स
पुत्रो दत्तको भवेत् ३० ४९९ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः दत्तात्मा तु स्वयं दत्तो ग
र्भे विन्नः सहोढजः ३१ ५०० उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः पिंडदोंशहरश्चैषां पूर्वाभावे
परः परः ३२ ५०१ सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः जातोपि दास्यां शूद्रेण कामतोंशहरो भवे
त् ३३ ५०२ मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकं अभ्रातृको हरेत्सर्वं दुहितॄणां सुताहते ३४

२६

पत्नीदुहितरश्चैवपितरौभ्रातरस्तथा तत्सुतागोत्रजाबंधुशिष्यसब्रह्मचारिणः ३५ ५०४ एषाम
भावेपूर्वस्यधनभागुत्तरोत्तरः स्वर्यातस्यह्यपुत्रस्यसर्ववर्णेष्वयंविधिः ३६ ५०५ वानप्रस्थय
तिब्रह्मचारिणांरिक्थभागिनः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः ३७ ५०६ दद्याद
पहरेच्चांशंजातस्यचमृतस्यच संसृष्टिनस्तुसंसृष्टीसोदरस्यतुसोदरः ३८ ५०७ अंन्योद
र्यस्तुसंसृष्टीनान्योदर्योधनंहरेत् असंसृष्ट्यपिवाऽऽदद्यात्संसृष्टोनान्यमातृजः ३९ ५०८ क्ली
बोथपतितस्तज्जः पंगुरुन्मत्तकोजडः अंधोचिकित्स्यरोगाद्याभर्तव्यास्तुनिरंशकाः ४० ५०९
औरसक्षेत्रजास्तेषांनिर्दोषाभागहारिणः सुतास्तेषांप्रभर्तव्यायावद्वैभर्तृसात्कृताः ४१
५१० अपुत्रायोषितश्चैषांभर्तव्याःसाधुवृत्तयः निर्वास्याव्यभिचारिण्यःप्रतिकूलास्तथैव
च ४२ ५११ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं आधिवेदनिकाद्यंचस्त्रीधनंपरिकी

२७

र्तितं ४३ ५१२ बंधुदत्तंतथाशुल्कमन्वाधेयकमेवच अप्रजायामतीतायांबंधवस्तदवाप्नुयुः ४४
५१३ अप्रजस्त्रीधनंभर्तुर्ब्राह्मादिषुचतुर्ष्वपि दुहितॄणांप्रसूताचेच्छेषेषुपितृगामितत् ४५
५१४ दत्वाकन्यांहरन्दंड्योव्ययंदद्याच्चसोदयं मृतायांदत्तमादद्यात्परिशोध्योभयव्ययं ४६
५१५ दुर्भिक्षेधर्मकार्येचव्याधौसंप्रतिरोधके गृहीतंस्त्रीधनंभर्तानास्त्रियैदातुमर्हति ४७ ५१६
अधिविन्नस्त्रियैदद्यादाधिवेदनिकंसमं नदत्तंस्त्रीधनंयस्यैदत्तेत्वर्धंप्रकीर्तितं ४८ ५१७
विभागनिह्नवेज्ञातिबंधुसाक्ष्यभिलेखितैः विभागभावनाज्ञेयागृहक्षेत्रैश्चयौतकैः ४९ ५१८
इतिदायविभागप्रकरणं सीम्नोविवादेक्षेत्रस्यसामंतास्थविरादयः गोपाःसीमाकृषाणायाः
सर्वेचवनगोचराः ५० ५१९ नयेयुरेतेसीमानंस्थलांगारतुषद्रुमैः सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितां ५१ ५२० सामंतावासमग्रामाश्चत्वारोष्टौदशापिवा रक्तस्रग्वसनाःसी

२७

मांनयेयुःक्षितिधारिणः ५२ ५२१ अन्तेतुपृथग्दंड्याराज्ञामध्यमसाहसं अभावेज्ञातृचिह्नानांरा
जासीम्नःप्रवर्तकः ५३ ५२२ आरामायतनग्रामनिपानोद्यानवेश्मसु एषएवविधिर्ज्ञेयोवर्षांबुप्र
वहादिषु ५४ २३ मर्यादायाःप्रभेदेतुसीमातिक्रमणेतथा क्षेत्रस्यहरणेदंडाअधमोत्तममध्य
माः ५५ ५२४ ननिषेध्योल्पबाधस्तुसेतुःकल्याणकारकः परभूमिंहरन्कूपःस्वल्पक्षेत्रोबहू
दकः ५६ ५२५ स्वामिनेयोनिवेद्यैवक्षेत्रेसेतुंप्रवर्तयेत् उसन्नेस्वामिनोभोगस्तदभावेमहीप
तेः ५७ ५२६ फालाहतमपिक्षेत्रंयोनकुर्यान्नकारयेत् सप्रदाप्याकृष्टफलंक्षेत्रमन्येनका
रयेत् ५८ ५२७ इतिसीमाविवादः माषानष्टौतुमहिषीसस्यघातस्यकारिणी दंडनीयातदर्ध
तुगौस्तदर्धमजाविकं ५९ ५२८ भक्षयित्वोपविष्टानांयथोक्ताद्द्विगुणोदमः सममेषांविवीतेतु
खरोष्ट्रंमहिषीसमं ६० ५२९ यावत्सस्यंविनश्येततावत्स्यात्क्षेत्रिणःफलं गोपस्तुताड्य

45

२८

स्कगोमी तु पूर्वोक्तं दंडमर्हति ६१ ५३० पथिग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते अकामतः कामचारे चौरवद्दं
डमर्हति ६२ ५३१ महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः पालो येषां च मोच्यास्ते दैवराजपरिप्लुताः
६३ ५३२ यथार्पितान्पशून्गोपः सायं प्रत्यर्पयेत्तथा प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः ६४ ५३३
पालदोषविनाशे तु पाले दंडो विधीयते अर्धत्रयोदशपणं स्वामिनो द्रव्यमेव च ६५ ५३४ ग्रामेच्छया गोप्र
चारो भूमिराजवशेन वा द्विजस्तृणैधपुष्पाणि सर्वतः स्ववदाहरेत् ६६ ५३५ धनुःशतं परीणाहो ग्रा
मक्षेत्रान्तरं भवेत् द्वेशते खर्वटस्य स्यान्नगरस्य चतुःशतं ६७ ५३६ इति स्वामिपालप्रकरणं स्वं लभेता
न्यविक्रीतं क्रेतुर्दोषोप्रकाशिते हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः ६८ ५३७ नष्टापहृतमा
साद्य हर्तारं ग्राहयेन्नरं देशकालातिपत्तौ वा गृहीत्वा स्वयमर्पयेत् ६९ ५३८ विक्रेतुर्दर्शनाच्छुद्धिः
स्वामी द्रव्यं नृपो दमं क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी ७० ५३९ आगमेनोपभोगेन न
ष्टं भाव्यमतोन्यथा पंचबंधो दमस्तस्य राज्ञे तेनाविभाविते ७१ ५४० हृतं प्रनष्टं यो द्रव्यं परहस्ता

२८

द्वाप्नुयात् अनिवेद्य नृपे दंड्यः स तु षण्णवतिं पणान् ७२ ५४१ शौल्किकैः स्थानपालैर्वा नष्टापहृतमा
हृतं अर्वाक्संवत्सरात् स्वामी हरेत परतो नृपः ७३ ५४२ पणानेकशफे दद्याच्चतुरः पंच मानुषे म
हिष्योष्ट्रगवां द्वौ द्वौ पादं पादमजाविके ७४ ५४३ इत्यस्वामिक्रयविक्रयप्रकरणं स्वकुटुंबाविरोधे
न देयं दारसुतादृते नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतं ७५ ५४४ प्रतिग्रहः प्रकाशः स्यात्स्था
वरस्य विशेषतः देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत्पुनः ७६ ५४५ इति दत्ताप्रदानिकं दशैकपंचस
प्ताहमासत्र्यहार्धमासिकं बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणं ७७ ५४६ अग्नौ सुवर्णम
क्षीणं रजते द्विपलं शते अष्टौ त्रपुणि सीसे च ताम्रे पंचदशायसि ७८ ५४७ शते दशपलावृ
द्धिरौर्णिकार्पासिसौत्रिके मध्ये पंचपला सूक्ष्मे तु त्रिपला मता ७९ ५४८ कार्मिके रोमबद्धे
च त्रिंशद्भागः क्षयो मतः न क्षयो न च वृद्धिः स्यात्कौशेये वल्कलेषु च ८० ५४९ देशं कालं च भो
गं च ज्ञात्वा नष्टे बलाबलं द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयं ८१ ५५० इति क्रीतानुश

२९

यग्रकरणं बलाद्दासीकृतश्चौरैर्विक्रीतश्चापिमुच्यते स्वामिप्राणप्रदोभक्तत्यागात्तन्निःक्रियादपि
८२ ५५१ प्रव्रज्यावसितोराज्ञोदासआमरणांतिकः वर्णानामानुलोम्येन दास्यंनप्रतिलोमतः ८३
५५२ कृतशिल्पोपिनिवसेत्कृतकालंगुरोर्गृहे अंतेवासीगुरुप्राप्तभोजनस्तत्फलप्रदः ८४ ५५३ दू
सम्पुपेत्याशुश्रूषप्रकरणं राजाकृत्वापुरेस्थानंब्राह्मणान्यस्यतत्रतु त्रैविद्यंवृत्तिमद्ब्रूयात्स्वध
र्मःपाल्यतामिति ८५ ५५४ निजधर्माविरोधेनयस्तुसामयिकोभवेत् सोपियत्नेनसंरक्ष्योधर्मोराज्ञा
कृतश्चयः ८६ ५५५ गणद्रव्यंहरेद्यस्तुसंविदंलंघयेच्चयः सर्वस्वहरणंकृत्वातंराष्ट्राद्विप्रवासयेत्
८७ ५५६ कर्तव्यंवचनंसर्वैःसमूहहितवादिनां यस्तत्रविपरीतस्यात्सदाप्यःप्रथमंदमं ८८ ५५७
समूहकार्यआयातान्कृतकार्यान्विसर्जयेत् सदानमानसत्कारैःपूजयित्वामही
धर्मज्ञाःशुचयोलुब्धाभवेयुःकार्यचिंतकाः कर्तव्यंवचनंतेषां समूहहितवादिनां ९१ ५६० श्री
पतिः ८९ ५५८ समूहकार्यप्रहितोयल्लभेततदर्पयेत् एकादशगुणंदाप्योयद्यसौनार्पयेत्स्वयं ९० ५५९

२९

षिनैगमपाखंडिगणानामप्ययंविधिः भेदंचैषांन्टपोरक्षेत्पूर्ववृत्तिंचपालयेत् ९२ ५६१ इतिसंविद्व्य
तिक्रमप्रकरणं गृहीतवेतनः कर्मत्यजन्द्विगुणमाहरेत् अगृहीतेसमंदाप्योभृत्यैरक्ष्यउपस्करः ९३ ५
६२ दाप्यस्तुदशमंभागंवाणिज्यपशुसस्यतः अनिश्चित्यभृतिंयस्तुकारयेत्समहीक्षिता ९४
५६३ देशंकालंचयोतीयात्कर्मकुर्याच्चयोन्यथा तत्रस्यात्स्वामिनश्छंदोधिकंदेयंकृतेधिके ९५
५६४ योयावत्कुरुतेकर्मतावत्तस्यतुवेतनं उभयोरप्यसाध्यंचेत्साध्येकुर्याद्यथाश्रुतं ९६ ५६५
अराजदैविकंनष्टंभांडंदाप्यस्तुवाहकः प्रस्थानविघ्नकृच्चैवप्रदाप्योद्विगुणांभृतिं ९७ ५६६
प्रक्रांतेसप्तमंभागंचतुर्थंपथिसंत्यजन् भृतिमर्धपथेसर्वांप्रदाप्यस्त्याजकोपिच ९८ ५६७
इतिवेतनादानप्रकरणं ग्लहेशतिकवृद्धेस्तुसभिकः पंचकंशतं गृह्णीयाद्धूर्तकितवादि
तराद्दशकंशतं ९९ ५६८ ससम्यक्पालितोदद्याद्राज्ञेभागंयथाकृतं जितमुद्ग्राहये
ज्जेत्रेदद्यात्सत्यंवचःक्षमी १०० ५६९ प्राप्तेन्टपतिनाभागेप्रसिद्धेधूर्तमंडले जितंसस

३०

भिकेस्थानेदापयेदन्यथानतु १ ५७० द्वयोरोव्यवहाराणांसाक्षिणश्चतरवहि राज्ञासचिह्नंनिर्वा
स्याः कूटाक्षोपधिदेविनः २ ५७१ द्यूतमेकमुखंकार्यंतस्करज्ञानकारणात् एषएवविधिर्ज्ञेयःप्रा
णिद्यूतेसमाह्वये ३ ५७२ इतिद्यूतसमाह्वयप्रकरणं सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणं
क्षेपंकरोतिचेद्दंड्यःपण्यानर्धत्रयोदशान् ४ ५७३ अभिगंतास्मिभगिनीमातरंवातवेस्यहं शपं
तंदापयेद्राजापंचविंशतिकंदमं ५ ५७४ अर्द्धोधमेषुद्विगुणःपरस्त्रीषूत्तमेषुच दंडप्रणयनं
कार्यंवर्णजात्युत्तराधरैः ६ ५७५ प्रातिलोम्यापवादेषुद्विगुणत्रिगुणादमाः वर्णानामानुलो
म्येनतस्मादर्धार्धहानितः ७ ५७६ बाहुग्रीवानेत्रसक्थिविनाशेवाचिकेदमः शत्यस्तदर्धि
कःपादनासाकर्णकरादिषु ८ ५७७ अशक्तस्तुवदन्नेवंदंडनीयःपणान्दश तथाशक्तः
प्रतिभुवंदाप्यःक्षेमायतस्यतु ९ ५७८ पतनीयकृतेक्षेपेदंडोमध्यमसाहसः मध्यमोजाति

३०

उपपातकयुक्तेतुदाप्यःप्रथमसाहसं १० ५७९ त्रैविद्यनृपदेवानांक्षेपउत्तमसाहसः मध्यमोजातिपूगा
नांप्रथमोग्रामदेशयोः ११ ५८० इतिवाक्पारुष्यप्रकरणं असाक्षिकहतेचिन्हैर्युक्तिभिश्चागमेनच
द्रष्टव्योव्यवहारस्तुकूटचिन्हकृतोभयात् १२ ५८१ भस्मपंकरजस्पर्शेदंडोदशपणःस्मृतः अमेध्य
पार्ष्णिनिष्ठ्यूतस्पर्शनेद्विगुणस्ततः १३ ५८२ समेष्वेवंपरस्त्रीषुद्विगुणस्तूत्तमेषुच हीनेष्वर्धदमो
मोहमदादिभिरदंडनं १४ ५८३ विप्रपीडाकरंछेद्यमंगमब्राह्मणस्यतु उद्गूर्णेप्रथमोदंडःसंस्प
र्शेतुतदर्धिकः १५ ५८४ उद्गूर्णेहस्तपादेतुदशविंशतिकौदमौ परस्परंतुसर्वेषांशस्त्रेम
ध्यमसाहसः १६ ५८५ पादकेशांशुककरोल्लुंचनेषुपणान्दश पीडाकर्षांशुकावेष्टपादाध्यासे
शतंदमः १७ ५८६ शोणितेनविनादुःखंकुर्वन्काष्ठादिभिर्नरः द्वात्रिंशतंपणान्दंड्योद्विगुणं
दर्शनेऽसृजः १८ ५८७ करपाददतोभंगेछेदनेकर्णनासयोः मध्योदंडोव्रणोद्भेदेमृतकल्पहते

३१

तथा १९ ५८८ चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने कंधराबाहुसक्थ्नां च भंगे मध्यमसाहसः २० ५
८९ एकं घ्नतां बहूनां च यथोक्ताद्द्विगुणो दमः कलहापहृतं देयं दण्डश्च द्विगुणस्ततः २१ ५९० दुः
खमुत्पादयेद्यस्तु स समुत्थानजं व्ययं दाप्यो दण्डं च यो यस्मिन् कलहे समुदाहृतः २२ ५९१ अभि
घाते तथा छेदे भेदे कुड्यावपातने पणान्दाप्यः पंचदश विंशतिं तद्व्ययं तथा २३ ५९२
दुःखोत्पादि गृहे द्रव्यं क्षिपन्प्राणहरं तथा षोडशाद्यः पणान्दाप्यो द्वितीयो मध्यमं दमं २४ ५९३
दुःखे च शोणितोत्पादे शाखांगच्छेदने तथा दंडः क्षुद्रपशूनां तु द्विपणप्रभृतिः क्रमात् २५ ५
९४ लिंगस्य छेदने मृत्यौ मध्यमो मूल्यमेव च महापशूनामेतेषु स्थानेषु द्विगुणो दमः २६ ५९५
प्ररोहिशाखिनां शाखास्कंधसर्वविदारणे उपजीव्यद्रुमाणां तु विंशतेर्द्विगुणो दमः २७ ५९६
चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते २८ ५९७
गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां पूर्वस्मृतादर्धदंडः स्थानेषूक्तेषु कर्तने २९ ५९८

३१

इतिदंडप्रकरणं सामान्यद्रव्यप्रसभहरणात्साहसंस्मृतं तन्मूल्याद्विगुणोदंडोनिह्नवेतुचतुर्गुणः
३० ५९९ यः साहसंकारयतिसदाप्योद्विगुणंदमं यश्चैवमुक्त्वाहंदाताकारयेत्सचतुर्गुणं ३१ ६००
अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्याप्रहारदः संदिष्टस्याप्रदाताचसमुद्रगृहभेदकृत् ३२ ६०१
सामंतकुलिकादीनामपकारस्यकारकः पंचाशत्पणिकोदंडएषामितिविनिश्चयः ३३ ६०२ स्व
च्छंदविधवागामीविक्रुष्टेनाभिधावकः अकारणेचविक्रोष्टाचांडालश्चोत्तमान्स्पृशन् ३४ ६०३
शूद्रप्रव्रजितानांचदैवेपित्र्येचभोजनः अयुक्तंशपथंकुर्वन्नयोग्योयोग्यकर्मकृत् ३५ ६०४
वृषक्षुद्रपशूनांचपुंस्त्वस्यप्रतिघातकृत् साधारणस्यापलापीदासीगर्भविनाशकृत् ३६ ६०५
पितापुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यकाः एषामपतितान्योन्यत्यागीचशतदंडभाक् ३७ ६०६
इतिसाहसप्रकरणं वसानस्त्रीन्पणान्दंड्योनेजकस्तुपरांशुकं विक्रयावक्रयाधानयाचितेषुप

णान्दद्या ३९ ६०७ पितापुत्रविरोधेतुसाक्षिणांत्रिपणोदमः अंतरेचतयोर्यस्यात्तस्याप्यष्टगुणोदमः ३९

३२ ६०८ तुलाशासनमानानाकूटकृन्नाणकस्यच एभिश्चव्यवहर्तावसदाप्योदममुत्तमं ४० ६०९ अकूटंकूटकंब्रूतेकूटंयश्चाप्यकूटकं सनाणकपरीक्षीतुदाप्यउत्तमसाहसं ४१ ६१० भिषक्मिथ्याचरन्दाप्यस्तिर्यक्षुप्रथमंदमं मानुषेमध्यमंराजमानुषेषूत्तमंदमं ४२ ६११ अवध्यंयश्चबध्नातिबद्धंयश्चप्रमुंचति अप्राप्तव्यवहारंचसदाप्योदममुत्तमं ४३ ६१२ मानेनतुलयावापियोंऽशमष्टमकंहरेत् दंडंसदाप्योद्विशतंवृद्धौहानौकेचोल्पितं ४४ ६१३ भेषजस्नेहलवणगंधधान्यगुडादिषु पण्येषुप्रक्षिपन्हीनंपणान्दाप्यस्तुषोडश ४५ ६१४ मृच्चर्ममणिसूत्रायःकाष्ठवल्कलवाससां अजातोजातिकरणेविक्रेयाष्टगुणोदमः ४६ ६१५ समुद्गपरिवर्तंचसारभांडंचकृत्रिमं आधानंविक्रयंवापि नयतोदंडकल्पना ४७ ६१६ भिन्नेपणेतुपंचाशत्पणेतुशतमुच्यते ३२ य

द्विपणेद्विशतोदंडोमूल्यवृद्धौचवृद्धिमान् ४८ ६१७ संभूयकुर्वतामर्घंसबाधंकारुशिल्पिनां अ
र्घस्यह्रासंवृद्धिंवाजानतांदमउत्तमः ४९ ६१८ संभूयवणिजांपण्यमनर्घेणोपरुंधतां
विक्रीणतांवाविहितोदंडउत्तमसाहसः ५० ६१९ राजनिस्थाप्यतेयोर्घः प्रत्यहंतेनविक्रयः क्र
योवानिस्त्रवस्तस्माद्वणिजांलाभकृत्स्मृतः ५१ ६२० स्वदेशपण्येतुशतंवणिग्गृह्णीतपंचकं
दशकंपारदेश्येतुयः सद्यः क्रयविक्रयी ५२ ६२१ पण्यस्योपरिसंस्थाप्यव्ययंपण्यसमुद्भवं अ
र्घोनुग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेवच ५३ ६२२ गृहीतमूल्यंयः पण्यंक्रेतुर्नैवप्रयच्छति सोद
यंतस्यदाप्योसौदिग्लाभंवादिगागते ५४ ६२३ विक्रीतमपिविक्रेयंपूर्वंक्रेतर्यगृह्णति हानि
श्चेत्क्रेतृदोषेणक्रेतुरेवहिसाभवेत् ५५ ६२४ राजदैवोपघातेनपण्येदोषमुपागते हानि
र्विक्रेतुरेवासौयाचितस्याप्रयच्छतः ५६ ६२५ अन्यहस्तेतुविक्रीतंदुष्टंवादुष्टवद्यदि विक्री

३२

यातिदमस्तत्रमूल्यात्तुद्विगुणोभवेत् ५७ ६२६ क्षयंवृद्धिंचवणिजांपण्यानामविजानतां क्रीत्वाना
नुशयः कार्यः कुर्वन्षड्भागदंडभाक् ५८ ६२७ इतिविक्रीयासंप्रदानं समवायेनवणिजांलाभार्थंक
र्मकुर्वतां लाभालाभौयथाद्रव्यंयथावासंविदाकृतौ ५९ ६२८ प्रतिषिद्धमनादिष्टंप्रमादाद्यच्च
नाशितं सतद्दद्याद्विपूर्वाच्चरक्षितादृशमांशभाक् ६० ६२९ अर्घप्रक्षेपणाद्विंशभागंशुल्कंन्
पोहरेत् व्यासिद्धंराजयोग्यंचविक्रीतंराजगामितत् ६१ ६३० मिथ्यावदन्परीमाणंशुल्कस्थाना
दपासरन् दाप्यस्त्वष्टगुणंयस्तुसव्याजक्रयविक्रयी ६२ ६३१ तरिकस्स्थलजंशुल्कंगृह्णन्द
प्यःपणान्दश ब्राह्मणप्रातिवेश्यानामेतदेवानिमंत्रणे ६३ ६३२ देशांतरगतेप्रेते द्रव्यंदायाद
बांधवाः ज्ञातयोवाहरेयुस्तदागतास्तैर्विनान्पः ६४ ६३३ जिह्मंत्यजेयुर्निर्लाभमशक्तोन्येन
कारयेत् अनेनविधिराख्यातऋत्विक्कर्षणकर्मिणां ६५ ६३४ इतिसंभूयसमुत्थानप्रकरणं

३२

ग्राहकैर्गृह्यतेचौरोलोप्त्रेणापिपदेनवा पूर्वकर्मापराधीचतथैवास्तुद्धवासकः ६६ ६३५ अंन्येपिशंक
यायाग्राह्याजातिनामादिनिह्नवैः द्यूतस्त्रीपानसक्ताश्चशुष्कभिन्नमुखस्वराः ६७ ६३६ परद्रव्यगृ
हाणांचपृच्छकाः गूढचारिणः निरायाव्ययवंतश्चविनष्टद्रव्यविक्रयाः ६८ ६३७ गृहीतंशंक
याचौर्येनात्मानंचेद्विशोधयेत् दापयित्वाहृतंद्रव्यंचौरदंडेनदंडयेत् ६९ ६३८ चौरंप्रदाप्यापहृ
तंघातयेद्विविधैर्वधैः सचिह्नंब्राह्मणंकृत्वास्वराष्ट्राद्विप्रवासयेत् ७० ६३९ घातितेपहृतेदो
षोग्रामभर्तुरनिर्गते विवीतभर्तुस्तुपथिचौरोद्धर्तुरवीतके ७१ ६४० स्वसीम्निदद्याद्ग्रामस्तुपदं
वायत्रगच्छति पंचग्रामीबहिःक्रोशाद्दशग्राम्यथवापुनः ७२ ६४१ बंदिग्राहांस्तथावाजीकुंजरा
णांचहारिणः प्रसह्यघातिनश्चैवशूलानारोपयेन्नरान् ७३ ६४२ उत्क्षेपकग्रंथिभेदौकरसं
दंशहीनकौ कार्यौद्वितीयापराधेकरपादैकहीनकौ ७४ ६४३ क्षुद्रमध्यमहाद्रव्यहरणात्सा

३४

स्तोदमः देशकालवयःशक्तिसंचिंत्यदंडकर्मणि ७५ ६४४ भक्तावकाशाग्न्युदकमंत्रोपकरणव्ययान्
दत्वाचोरस्यहंतुर्वाजानतोदंडउत्तमः ७६ ६४५ शस्त्रावपातेगर्भस्यपातनेचोत्तमोदमः उत्तमोवाध
मोवापिपुरुषस्त्रीप्रमापणे ७७ ६४६ विप्रदुष्टांस्त्रियंचैवपुरुषघ्नीमगर्भिणीं सेतुभेदकरींचाप्सु
शिलांबध्वाप्रवेशयेत् ७८ ६४७ विषाग्निदांपतिगुरुनिजापत्यप्रमापणीं विकर्णकरनासौष्ठीं
कृत्वागोभिःप्रमापयेत् ७९ ६४८ अविज्ञातहतस्याशुकलहंसुतबांधवाः प्रष्टव्यायोषितश्चास्य
परपुंसिरताःपृथक् ८० ६४९ स्त्रीद्रव्यवृत्तिकामोवाकेनवायंगतःसह मृत्युदेशसमासन्नं
पृच्छेद्वापिजनंशनैः ८१ ६५० क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः राजपत्न्यभिगामीचदग्ध
व्यास्तुकटाग्निना ८२ ६५१ इतिस्तेयप्रकरणं पुमान्संग्रहणेग्राह्यःकेशाकेशिपरस्त्रियाः ३४
सद्योवाकामजैश्चिह्नैःप्रतिपत्तौद्वयोस्तथा ८३ ६५२ नीवीस्तनप्रावरणसक्थिकेशावमर्श

नं अदेशकालेसंभाषंसहैकस्थानमेवच ८४ ६५३ स्त्रीनिषेधेशतंदद्याद्विगुणंतुदमंपुमान् प्रतिषे
धेतयोर्दंडोयथासंग्रहणेतथा ८५ ६५४ सजातावुत्तमोदंडआनुलोम्येतुमध्यमः प्रातिलोम्येवधःपुं
सोनार्याःकर्णादिकर्तनं ८६ ६५५ अलंकृतोहरन्कन्यामुत्तमंह्यन्यथाधमं दंडंदद्यात्सवर्णासुप्रा
तिलोम्येवधःस्मृतः ८७ ६५६ सकामास्वनुलोमासु नदोषस्त्वन्यथादमः दूषणेतुकरच्छेदउत्त
मायांवधस्तथा ८८ ६५७ शतंस्त्रीदूषणेदद्यात् द्वेतुमिथ्याभिशंसने पशून्गच्छन् शतंदा
प्योहीनस्त्रीगांचमध्यमं ८९ ६५८ अवरुद्धासुदासीषुभुजिष्यासुतथैवच गम्यास्वपिपुमा
न्दाप्यःपंचाशत्पणिकंदमं ९० ६५९ प्रसह्यदास्यभिगमेदंडोदशपणःस्मृतः बहूनांयद्य
कामासौचतुर्विंशतिकःपृथक् ९१ ६६० गृहीतवेतनावेश्यानेच्छंतीद्विगुणंवहेत् अगृही
तेसमंदाप्यापुमानप्येवमेवतु ९२ ६६१ अयोनौगच्छतोयोषांपुरुषंवापिमेहतः चतुर्विं

३५

शतिकोदंडस्तथाप्रव्राजितागमे ९३ ६६२ अंत्याभिगमनेत्वंक्यकुबंधेनप्रवासयेत् शूद्रस्तथांतए वस्यादंत्यस्यार्यागमेवधः ९४ ६६३ इतिस्त्रीसंग्रहणप्रकरणं ऊनंवाप्यधिकंवापिलिखेद्योराज शासनं पारदारिकंचौरं वामुंचतोदंडउत्तमः ९६ ६६४ अभक्ष्येणद्विजंदूष्यदंड्यउत्तमसाहसं मध्य मंक्षत्रियंवैश्यंप्रथमंशूद्रमर्धिकं ९७ ६६५ कूटस्वर्णव्यवहारीविमांसस्यविक्रयी अंगहीनस्तुक र्तव्योदाप्यश्चोत्तमसाहसं ९८ ६६६ चतुष्पादकृतोदोषोनापेहीतिप्रजल्पतः काष्ठलोष्ठेषु पाषाणबाहुयुग्यकृतस्तथा ९९ ६६७ छिन्ननस्येनयानेनतथाभग्नयुगादिना पश्चाच्चैवा पसरतोहिंसनेस्वाम्यदोषभाक् १०० ६६८ शक्तोप्यमोक्षयन्स्वामीदंष्ट्रिणांशृंगिणांतथा प्र थमंसाहसंदद्याद्विक्रुष्टेद्विगुणंतथा १ ६६९ जारंचौरेत्यभिवदन्दाप्यःपंचशतंदमं उपजीव्यध नंमुंचंस्तदेवाष्टगुणीकृतं २ ६७० राज्ञोनिष्टप्रवक्तारंतस्यैवाक्रोशकारिणं तन्मंत्रस्यभेत्ता

३५
छ्

रंछित्वाजिह्वांप्रवासयेत् ३ ६७१ मतांगलग्नविक्रेतुगुरोस्ताडयितुस्तथा राजयानासनारोढुर्दंडउत्त
मसाहसः ४ ६७२ द्विनेत्रभेदिनोराजद्विष्टादेशकृतस्तथा विप्रत्वेनचशूद्रस्यजीवतोष्टशतोदमः
५ ६७३ दुर्दृष्टांस्तुपुनर्दृष्ट्वाव्यवहारान्नृपेणतु सभ्याःसजयिनोदंड्याः।। विवादाद्विगुणं
दमं ६ ६७४ योमन्येताजितोस्मीतिन्यायेनापिपराजितः तमायांतंपुनर्जित्वादापयेद्द्विगुणं
दमं ७ ६७५ राज्ञान्यायेनयोदंडोगृहीतोवरुणायतं निवेद्यदद्याद्विप्रेभ्यः स्वयंत्रिंश
द्गुणीकृतं ८ ६७६ एवमुद्धृतदंडानांविशुद्धिःपापकर्मिणां स्वधर्मस्थापुनाद्राजाप्रजा
भ्योधर्ममस्नुते ९ ६७७ इतियाज्ञवल्कीयेधर्मशास्त्रेद्वितीयोध्यायः ऊनद्विवर्षंनिखने
न्नकुर्यादुदकंततः आश्मशानादनुव्रज्यइतरोज्ञातिभिर्मृतः १० ६७८ यमसूक्तंतथागा
थांजपद्भिर्लौकिकाग्निना सदग्धव्यउपेतश्चेदाहिताग्न्यावृतार्थवत् ११ ६७९ सप्तम

२६

द्दशमाहापिज्ञातयोप्युपयंत्यपः अपनः शोशुचदघमनेनपित्र्यदिङ्मुखाः ३ ६८० एवंमातामाह्या
चार्य्यप्रेतानामुदकक्रिया कामोदकंसखिप्रत्तास्वस्त्रीयश्वसुरर्त्विजां ४ सहस्रसिंचंसुदकंना
मगोत्रेण्यावाग्यताः नब्रह्मचारिणःकुर्युरुदकंपतितास्तथा पाखंड्यनाश्रितास्तेनाभर्तृघ्न्यःका
मगादिकाः सुराप्यआत्मत्यागिन्योनाशौचोदकभागिनः ६ ६८३ कृतोदकान्समुत्ती
र्णान्मृदुशाद्वलसंस्थितान् स्नातानपवदेयुस्तानितिहासैःपुरातनैः ७ ६८४ मानुष्येकद
लीस्तंभनिस्सारेसारमार्गणं करोतियःससंमूढोजलबुद्बुदसन्निभे ८ ६८५ पंचधासंभ्र
तःकायोयदिपंचत्वमागतः कर्मभिस्स्वशरीरोत्थैस्तत्रकापरिदेवना ९ ६८६ गंत्रीवसुमती
नाशमुदधिर्दैवतानिच फेनप्रख्यःकथंनाशंमर्त्यलोकोनयास्यति १० ६८७ श्लेष्माश्रुबां
धवैर्मुक्तंप्रेतोभुंक्तेयतोवशः अतोनरोदितव्यंहिक्रियाःकार्याःस्वशक्तितः ११ ६८८ इति

श्रीराम

२६

72

संस्कृत्यगच्छेयुर्गृहंबालपुरःसराः विदश्यनिंबपत्राणिनियतंद्वारिवेश्मनः १२ ६८९ आचम्याग्न्यादि
सलिलंगोमयंगौरसर्षपान् प्रविशेयुःसमालभ्यकृत्वाश्मनिपदंशनैः १३ ६९० प्रवेशनादिकंक
र्मप्रेतसंस्पर्शिनामपि इच्छतांतत्क्षणाच्छुद्धिः परेषांस्नानसंयमात् १४ ६९१ आचार्यपितृपाध्या
यान्निर्हृत्यापिव्रतीव्रती सकटान्नंचनाश्नीयान्नचतैःसहसंवसेत् १५ ६९२ क्रीतलब्धाशना
भूमौस्वपेयुस्तेपृथक्पृथक् पिंडयज्ञावृतादेयंप्रेतायान्नंदिनत्रयं १६ ६९३ जलमेकाहमाका
शस्थाप्यंक्षीरंचमृन्मये वैतानोपासनाःकार्याःक्रियाश्चश्रुतिचोदनात् १७ ६९४ क्षत्रस्यद्वा
दशाहानिविशःपंचदशैवतु त्रिंशद्दिनानिशूद्रस्यतदर्धंन्यायवर्तिनः १८ ६९५ आदंतज
ननात्सद्यआचूडान्नैशिकीस्मृता त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरं १९ ६९६ त्रिरात्रंदश
रात्रंवाशावमाशौचमिष्यते ऊनद्विवर्षउभयोःसूतकंमातुरेवहि २० ६९७ पित्रोस्तुसूतकंमा

३२

तुल्लदस्सन्दर्शनाश्चवं तदहर्नप्रदुष्येत्तपूर्वेषांजन्मकारणात् २१ ६९८ अंतराजन्ममरणेशौचादोभि
र्विशुध्यति गर्भस्त्रावेमासतुल्यानिरात्राः शुद्धेस्तुकारणं २२ ६९९ हतानांन्रूपगोविप्रैरन्वक्षेचात्मघा
तिनां प्रोषितेकालशेषस्यापूर्णेदत्वोदकंशुचिः २३ ७०० अहस्त्वदत्तकन्यासुबालेषुचविशोधनं
गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषुच २४ ७०१ अनौरसेषुपुत्रेषुभार्यास्वन्यागतासुच निवा
सराजनिप्रेतेतदहःशुद्धिकारणं २५ ७०२ ब्राह्मणेनानुगंतव्योनशूद्रेणद्विजःक्वचित् अनुगे
म्याभसिस्नात्वास्पृष्ट्वाग्निंघृतभुक्शुचिः २६ ७०३ महीपतीनांनाशौचंहतानांविद्युतातथा
गोब्राह्मणार्थेसंग्रामेयस्यचेच्छतिपार्थिवः २७ ७०४ ऋत्विजांदीक्षितानांचयाज्ञियंकर्मकुर्वतां
सत्रिव्रतिब्रह्मचारी दातृब्रह्मविदांतथा २८ ७०५ दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे आ
पद्यपिहिकष्टायांसद्यःशौचंविधीयते २९ ७०६ उदक्याशुचिभिःस्नायात्संस्पृष्टैस्तैरुपस्पृ ३२

74

शेत् अलिंगानि जपेच्चैव सावित्रीं मनसा सकृत् ३० ७०७ कालोऽग्निः कर्ममृद्वायुर्मनो ज्ञानं तपो
जलं पश्चात्तापो निराहारः सर्वेमी शुद्धिहेतवः ३१ ७०८ अकार्यकारिणां दानं वेगो नद्यास्तु शुद्धि
कृत् शोध्यस्य मृच्च तोयं च सन्यासो वै द्विजन्मनां ३२ ७०९ तपो वेदविदां क्षांतिर्विदुषां वर्ष्मणो जलं
जपः प्रच्छन्नपापानां मनसः सत्यमुच्यते ३३ ७१० भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनं क्षेत्र
ज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ३४ ७११ इत्याशौचप्रकरणं क्षात्रेण कर्मणा जीवेद्विशां वा
॰प्यापदि द्विजः निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि ३५ १२ फलोपलक्षौमसोम
मनुष्यापूपवीरुधः तिलौदनरसक्षारान् दधि क्षीरं घृतं जलं ३६ १३ शस्त्रासवमधूच्छिष्टं मधु
लाक्षाथबर्हिषः मृच्चर्मपुष्पकुतुपकेशतक्रविषक्षितीः ३७ १४ कौशेयनीलीलवणमां
सैकशफसीसकान् शाकार्द्रौषधिपिण्याकपशुगंधांस्तथैव च ३८ १५ वैश्यवृत्त्यापि जीव

३८

न्नोविक्रीणीतकदाचन धर्मार्थंविक्रयंनेयास्तिलाधान्येनतत्समाः ३९ ७१६ लाक्षालवणमांसानि
पतनीयानिविक्रये पयोदधितथामद्यं हीनवर्णकराणितु ४० ७१७ आपद्गतः संप्रगृह्ण
न्भुंजानोपियतस्ततः नलिप्येतेनसाविप्रोज्वलनार्कसमोहिसः ४१ १८ कृषिःशिल्पंभृ
तिर्विद्या कुसीदं शकटं गिरिः सेवानूपंनृपोभैक्षमापत्तौजीविनानितु ४२ १९
बुभुक्षितस्त्र्यहंस्थित्वा धान्यमब्राह्मणाद्धरेत् प्रतिगृह्यतदाख्येयमभियुक्तेनध
र्मतः ४३ ७२० तस्यवृत्तंकुलंशीलंश्रुतमध्ययनंतपः ज्ञात्वाराजाकुटुंबंचधर्म्यांवृ
त्तिंप्रकल्पयेत् ४४ २१ इत्यापद्धर्मप्रकरणं सुतविन्यस्तपत्नीकस्तयावानुगतो
वनं वानप्रस्थोब्रह्मचारीसाग्निःसोपासनोव्रजेत् ४५ २२ अफालकृष्टेनाग्नींश्चपि
तॄन्देवातिथीनपि भृत्यांश्चतर्पयेत्श्मश्रुजटालोमभृदात्मवान् ४६ २३ अक्षोमा

३८

सस्यषण्मांवातथासंवत्सरस्यवा अर्थस्यसंचयंकुर्यात्कृतमाश्वयुजेत्सजेत् ४७ ७२४ दांतस्त्रिष
वणास्नायीनिवृत्तश्चप्रतिग्रहात् स्वाध्यायवान्दानशीलः सर्वसत्वहितेरतः ४८ २५ स्वप्या
ङ्कमोसुचीरात्रौ दिवासंप्रपदैर्नयेत् दांतोलूखलिकः कालपक्वाशीवाश्मकुट्टकः ४९ २६
चांद्रायणैर्नयेत्कालंकृच्छ्रैर्वावर्तयेत्सदा पक्षगतेथवाश्नीयान्मासेवाहनिवागते ५० २७ श्रो
तस्मार्तंफलस्नेहैः कर्मकुर्यात्क्रियास्तथा स्थानासनविहारैर्वायोगाभ्यासेनवातथा ५१
७२८ ग्रीष्मेपंचाग्निमध्यस्थोवर्षासुस्थंडिलेशयः आर्द्रवासास्तुहेमंतेशक्त्यावापितप
श्चरेत् ५२ २९ यः कंटकैर्वितुदतिचंदनैर्यश्चलिंपति अक्रुद्धोपरितुष्टश्चसमस्तस्य
चतस्यच ५३ ७३० अग्नीन्वाप्यात्मसात्कृत्वावृक्षावासोमिताशनः वानप्रस्थगृहे
ष्वेवयात्रार्थंभैक्ष्यमाचरेत् ५४ ३१ ग्रामादाहृत्यवाग्रासानष्टौभुंजीतवाग्यतः वायुभक्षः

३९

भ्रायुर्दीर्घं गच्छेद्वा वर्षं संक्षयात् इतिवानप्रस्थप्रकरणं वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणां
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ५६ ७३३ अधीतवेदो जपकृत्पुत्रवानन्नदोग्निमान्
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ५७ ३४ सर्वभूतहितः शांतस्त्रीदंडी सकमंडलुः ए
कारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ५८ ७३५ अप्रमत्तश्चरेद्भैक्षं सायाह्नेनभिलक्षितः
रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ५९ ३६ यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च स
लिलं शुद्धिरेतेषां गोवालैश्चावघर्षणं ६० ७३७ सन्निरुध्येंद्रियग्रामं रागद्वेषौ प्रहाय च
भयं हित्वा च भूतानाममृती भवति द्विजः ६१ ७३८ कर्तव्याशयशुद्धिस्तु भिक्षुकेण विशे
षतः ज्ञानोत्पत्तिनिमित्तत्वात्स्वातंत्र्यकरणाय च ६२ ३९ अवेक्ष्या गर्भवासाश्च कर्मजा
गतयस्तथा आधयो व्याधयः क्लेशा जरारूपविपर्ययः ६३ ७४० भवो जातिसहस्रेषु ३९

78

प्रियाप्रियविपर्ययः ध्यानयोगेनसंपश्येत्सूक्ष्मआत्मात्मनिस्थितः ६४ ७४१ नाश्रमःकारणंधर्मेक्रिय
माणोभवेद्धिसः अतोयदात्मनोपथ्यंपरेषांनतदाचरेत् ६५ ७४२ सत्यमस्तेयमक्रोधोह्रीःशौचंधी
र्धृतिर्दमः संयतेंद्रियताविद्याधर्मःसर्वउदाहृतः ६६ ७४३ निःसरंतियथालोहपिंडात्तप्तात्स्फु
लिंगकाः सकाशादात्मनस्तद्वदात्मानःप्रभवंतिहि ६७ ७४४ तत्रात्माहिस्वयंकिंचित्कर्मकिंचि
त्स्वभावतः करोतिकिंचिदभ्यासाद्धर्माधर्मोभयात्मकं ६८ ४५ निमित्तमक्षरःकर्ताबोद्धाब्रह्मगु
णीवशी अजःशरीरग्रहणात्सजातइतिकीर्त्यते ६९ ७४६ सर्गादौसयथाकाशंवायुंज्योतिर्जलं
लंमहीं सृजत्येकोत्तरगुणांस्तथादत्तेभवन्नपि ७० ७४७ आहुत्याप्याययेत्सूर्यंसूर्याद्वृष्टिरथौ
षधीः तदन्नंरसरूपेणशुक्रत्वमुपगच्छति ७१ ७४८ स्त्रीपुंसयोश्चसंयोगेविशुद्धेशुक्रशोणि
ते पंचधातून्स्वयंषष्ठआदत्तेयुगपत्प्रभुः ७२ ७४९ इंद्रियाणिमनःप्राणोज्ञानमायुःसुखं

ह्रीः

ति

४०

धृतिः धारणाप्रेरणाद्दुःखंमिच्छाहंकारएवच ७३ ७५० प्रयत्नश्चाकृतिर्वर्णः स्वरद्वेषौभवाभवौ तस्येत

दात्मजंसर्वमनादेरादिमिच्छतः ७४ ७५१ प्रथमेमासिसंक्लेदभूतोधातुर्विमूर्छितः मास्यर्बुदंद्वितीयेतुतृतीयेगेंद्रियैर्युतः ७५ ५२ आकाशाल्लाघवंसौक्ष्म्यंशब्दंश्रोत्रंबलादिकं वायोस्तुस्पर्शनंचेष्टांव्यूहनंरौक्ष्यमेवच ७६ ५३ पित्तात्तुदर्शनंपक्तिमौष्ण्यंरूपंप्रकाशिता रसात्तुरसनंशैत्यंस्नेहंक्लेदंसमार्दवं ७७ ७५४ भूमेर्गंधंतथाघ्राणंगौरवंमूर्तिमेवच आत्मागृह्णात्यजःसर्वंतृतीयेस्पंदतेततः ७८ ७५५ दोहदस्याप्रदानेनगर्भोदोषमवाप्नुयात् वैरूप्यंमरणंवापितस्मात्कार्यंप्रियंस्त्रियाः ७९ ५६ स्थैर्यंचतुर्थेत्वंगानांपंचमेशोणितोद्भवः षष्ठेबलस्यवर्णस्यनखरोम्णांचसंभवः ८० ७५७ मनश्चैतन्ययुक्तोसौनाडीस्नायुशिरायुतः सप्तमेचाष्टमेचैवत्वङ्मांसस्मृतिमानपि ८१ ७५८ पुनर्धात्रींपुनर्गर्भमोजस्तस्यप्रधावति अष्टमेमास्यतोजातोगर्भश्चप्राणै

४०

विंयुज्यते ८२ ७५९ नवमेदह्यामेवापिप्रबलैः सूतिमारुतैः निःसार्यतेबाणइवयंत्रछिद्रेणसज्वरः ८३
७६० तस्यषोढाशरीराणिषट्त्वचोधारयंतिच षडंगानितथास्थ्नांचसहषष्ट्याशतत्रयं ८४ ६१ स्था
लैःसहचतुःषष्टिर्दंतावैविंशतिर्नखाः पाणिपादशलाकाश्चतासांस्थानचतुष्टयं ८५ ६२
षष्ट्यंगुलीनांद्वेपार्ष्ण्योर्गुल्फेषुचचतुष्टयं चत्वार्यरत्निकास्थीनिजंघयोस्तावदेवतु ८६ ६३
द्वेद्वेजानुकपोलोरुफलकांससमुद्भवे अक्षतालूषकेश्रोणीफलकेचविनिर्दिशेत् ८७ ६४
भगास्थ्येकंतथापृष्ठेचत्वारिंशाच्चपंचच ग्रीवापंचदशास्थिस्याज्जत्र्वेकंचतथाहनुः ८८ ६५
तन्मूलेद्वेललाटाक्षिगंडेनासाघनास्थिका पार्श्वकाःस्थालकैःसार्धमर्बुदैश्चद्विसप्ततिः ८९
७६६ द्वौशंखकौकपालानिचत्वारिशिरसस्तथा उरःसप्तदशास्थीनिपुरुषस्यास्थिसंग्र
हः ९० ६७ गंधरूपरसस्पर्शशब्दाश्चविषयास्मृताः नासिकालोचनेजिह्वात्वक्श्रोत्रंचे

४१

ड्रियाणितु ७६८ हस्तौपायुरुपस्थंचजिह्वापादौचपंचवै कर्मेंद्रियाणिजानीयान्मनश्चैवाभयात्मि
कं ९२ ७६९ नाभिरोजोगुदंशुक्रंशोणितंशंखकौतथा मूर्द्धासकंठहृदयःप्राणस्यायतनानिच
९३ ७७० वसावपावहननंनाभिः क्लोमयकृत्प्लिहा क्षुद्रांत्रंवृक्ककौबस्तिःपुरीषाधानमेवच
९४ ७७१ आमाशयोथहृदयंस्थूलांत्रंगुदमेवच उदरंचगुदौकोष्ठाविस्तारोयमुदाहृतः ९५ ७७२
कनीनिकेचाक्षिकूटेशष्कुलीकर्णपत्रकौ गंडौशंखौभ्रुवौदंतावेष्टावोष्ठौककुंदरे ९६ ७७३
वंक्षणौवृषणौरक्कौश्लेष्मसंघातजौस्तनौ उपजिह्वास्फिजौबाहूजंघोरुचपिंडिका ९७ ७७४
तालूदरंबस्तिशीर्षंचिबुकंगलशुंडिके अवटुश्चैवमेतानिस्थानान्यत्रकलेवरे ९८ ७७५ अक्षि
कर्णचतुष्कंचपड्‌स्तहृदयानिच नवछिद्राणितान्येवप्राणस्यायतनानिच ९९ ७७६ शिराः
शतानिसप्तैवंनवस्नायुशतानिच षट्‌पंचाशच्चजानीतशिराधमनिसंज्ञिताः १ ७७८ ४१

त्रयोलक्षास्तु विज्ञेयाः श्मश्रुकेशाः शरीरिणां समोत्तरं मर्मशतं द्वे च संधिशते तथा २ ७०९ रोम्णां को
ट्यस्तु पंचाशच्चतस्त्रः कोट्य एव च सप्तषष्टिस्तथा लक्षाः सार्धाः स्वेदायनैः सह ३ ७१० वायवीये
र्विगण्यंते विभक्ताः परमाणवः यद्यप्येकोनु वै देषां भावानां चैव संस्थितिं ४ ७११ रसस्य नव वि
ज्ञेया जलस्यांजलयो दश सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः ५ ७१२ षट् श्लेष्मा पंच पि
त्तं तु चत्वारो मूत्रमेव च वसा त्रयो द्वौ तु मेदो मज्जैकोर्धं तु मस्तके ६ ७१३ श्लेष्मौजसस्तावदेव
रेतसस्तावदेव तु इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कल्पते ७ ७१४ द्वासप्ततिसहस्राणि हृद
यादभिनिःसृताः हिता नाम हिता नाड्यस्तासां मध्ये शशिप्रभं ८ ७१५ मंडलं तस्य मध्यस्थ
आत्मा दीप इवाचलः स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ९ ७१६ ज्ञेयं चारण्यकमहं यदादि
त्यादवाप्तवान् योगशास्त्रं च मत्प्रोक्तं ज्ञेयं योगमभीप्सता १० ७१७ अनन्यविषयं कृत्वा म
नो बुद्धिस्मृतींद्रियं ध्येय आत्मा स्थितो योसौ हृदये दीपवत्प्रभुः ११ ७१८ यथाविधानेन प

४२

ठन्सामगायमविच्युतं सावधानस्तथाभ्यासात्परंब्रह्माधिगच्छति १२ ७१९ अपरांतकमुल्लोप्यंमद्रकंप्र
करीतथा औवेणकंसरोबिंदुमुत्तरंगीतकानिच १३ ७२० ऋग्गाथापाणिकादक्षविहितब्रह्मगीतिका
गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितं १४ ७२१ वीणावादनतत्वज्ञःश्रुतिजातिविशारदः तालज्ञ
श्चाप्रयासेनमोक्षंमार्गंनियच्छति १५ ७२२ गीतज्ञोयदियोगेननाप्नोतिपरमंपदं रुद्रस्यानुचरोभूत्वा
सहतेनैवमोदते १६ ७२३ इतियोगप्रकरणं अनादिरात्माकथितस्तस्यादिस्तुशरीरकं आत्मन
श्चजगत्सर्वंजगतश्चात्मसंभवः १७ ७२४ कथमेतद्विमुह्यामःसदेवासुरमानवं जगदुद्भूतमात्मा
चकथंतस्मिन्वदस्वनः १८ ७२५ मोहजालमपास्येदंपुरुषोदृश्यतेहियः सहस्रकरपन्नेत्रः सू
र्यवर्चाःसहस्रकः १९ ७२६ सआत्माचैवयज्ञश्चविश्वरूपःप्रजापतिः विराजःसोन्नरूपेणय
ज्ञत्वमुपगच्छति २० ७२७ योद्रव्यदेवतात्यागसंभूतोरसउत्तमः देवान्संतर्प्यसरसोयजमानंफ
लेनच २१ ७२८ संयोज्यवायुनासोमंनीयतेरश्मिभिस्ततः ऋग्यजुःसामविहितंसौरंधा

४२

मोपनीयते २२ ७२९ स्वमंडलादसौसूर्यः सृजत्यमृतमुत्तमं यज्जन्मंसर्वभूतानांमशानानशनात्मनो २३ ७३० तस्माद
न्नात्पुनर्यज्ञः पुनरन्नंपुनः क्रतुः एवमेतदनाद्यंतंचक्रंसंपरिवर्तते २४ ७३१ अनादिरात्मासंभूतिर्विद्यतेनांत
रात्मनः समवायीतुपुरुषोमोहेच्छाद्वेषकर्मजः २५ ७३२ सहस्रात्मामया योवआदिदेवउदाहृतः मुखबाहूरुप
ज्जास्युस्तस्यवर्णायथाक्रमं २६ ७३३ पृथिवीपादतस्तस्यशिरसोद्यौरजायत नस्तःप्राणादिशःश्रोत्रात्स्पर्शाद्वा
युर्मुखाच्छिखी २७ ७३४ मनसश्चंद्रमाजातश्चक्षुषश्चदिवाकरः जघनादंतरिक्षंचजगच्चसचराचरं २८ ७३५
यद्येवंसकथंब्रह्मन्पापयोनिषुजायते ईश्वरःसकथंभावैरनिष्टैःसंप्रयुज्यते ३६ करणैरन्वितस्यापिपूर्वं
ज्ञानंकथंचन वेत्तिसर्वगतंकस्मात्सर्वगोपिनवेदनां ३० ७३७ अंत्यपक्षिस्थावरतांमनोवाक्कायकर्मजैः दो
षैःप्रयातिजीवोयंभवन्योनिशतेषुच ३१ ७३८ अनंतांश्चयथाभावाःशरीरेषुशरीरिणां रूपाण्यपितथै
वेहसर्वयोनिषुदेहिनां ३२ ७३९ विपाकःकर्मणांप्रेत्यकेषांचिदिहजायते इहचामुत्रचैकेषांभावस्तत्रप्रयोज
नं ३३ ७४० परद्रव्याण्यभिध्यायंस्तथानिष्टानिचिंतयन् वितथाभिनिवेशीचजायतेंत्यासुयोनिषु ३४ ७४१
पुरुषोनृतवादीचपिसुनःपरुषस्तथा अनिबद्धप्रलापीचमृगपक्षिषुजायते ३५ ७४२ अदत्तादाननिरतः

४३

परदारोपसेवकः हिंसकश्चाविधानेनस्थावरेषूपजायते ३६ ७४३ आत्मज्ञः शौचवान्दांतस्तपस्वीविजितेंद्रियः धर्म
कृत्वेदविद्यासिसात्विकोदेवयोनितो ३७ ७४४ असत्कार्यरतोऽधीर आरंभीविषयीन्वयः सराजसेमनुष्येषुमृतो
जन्माधिगच्छति ३८ ७४५ निद्रालुः क्रूरकृल्लुब्धोनास्तिकोयाचकस्तथा प्रमादवान्भिन्नवृत्तोभवेत्तिर्यक्षुता
मसः ३९ ७४६ रजसातमसाचैवसमाविष्टोभ्रमन्निह भावैरनिष्टैःसंयुक्तः संसारंप्रतिपद्यते ४० ७४७ मलिनोहियथा
दर्शोरूपालोकस्यनक्षमः तथाऽविपक्ककरणआत्मज्ञानस्यनक्षमः ४१ ७४८ कट्वीवीरोयथापक्वेमधुरःसन्न
सोपिन प्राप्यतेह्यात्मनितथा नापक्वकरणेज्ञता ४२ ७४९ सर्वाश्रयांनिजेदेहेदेहीविंदतिवेदनां योगीमुक्तश्च
सर्वासांयोनचाप्नोतिवेदनां ४३ ५० आकाशमेकंहियथाघटादिषुपृथग्भवेत् तथात्मैकोह्यनेकश्चजलभां
डेष्विवांशुमान् ४४ ५१ ब्रह्मखानिलतेजांसिजलंभूश्चेतिधातवः इमेलोकाएषचात्मातस्माच्चसचराच
रं ४५ ५२ मृद्दंडचक्रसंयोगात्कुंभकारोयथाघटं करोतितृणमृत्काष्ठैर्गृहंवागृहकारकः ४६ ५३ हेम
मात्रमुपादायरूप्यंवाहेमकारकः निजलालासमायोगात्कोशंवाकोशकारकः ४७ ५४ करणान्येव
मादायतासुतास्विहयोनिषु सृजत्यात्मानमात्मैवसंभूयकरणानिच ४८ ५५ महाभूतानिसत्यानिय

४३

थात्मापित्तथैवाद्रि कोन्यैथैकेननेत्रेणदृष्टमन्येनपश्यति ४९ ७५६ वार्धूचाकोविजानातिपुनःसंस्कृत्यसंस्कृतो अ
तीतार्थास्मृतिःकस्यकोवास्वप्नस्यकारकः ५० ७५७ ज्ञातिरूपवयोवृत्तविद्यादिभिरहंकृतः शब्दादिवि
षयोद्योगंकर्मणामनसागिरा ५१ ५८ ससंदिग्धमतिःकर्मफलमास्तिनवेतिवा विपुलःसिद्धमात्मान
मासिद्धापिहिमन्यते ५२ ५९ ममदाराःसुतामात्या अहमेषामितिस्थितिः हिताहितेषुभावेषुविपरीतम
तिःसदा ५३ ७६० ज्ञेयज्ञेप्रकृतौचैवविकारेचाविशेषवान् अनाशकानलापातजलप्रपतनोद्यमी ५४
७६१ एवंवृत्तोऽविनीतात्मावितथाभिनिवेशवान् कर्मणाद्वेषमोहाभ्यामिच्छयाचैवबध्यते ५५ ७६२ आ
चार्योपासनंवेदशास्त्रेषुचविवेकिता तत्कर्मणामनुष्ठानंसंगःसद्भिर्गिरःशुभाः ५६ ७६३
स्त्र्यालोकालंभविगमःसर्वभूतात्मदर्शनं त्यागःपरिग्रहाणांचजीर्णकाषायधारणं ५७ ६४ विषयेंद्रि
यसंरोधस्तंद्रालस्यविवर्जनं शरीरपरिसंख्यानंप्रवृत्तिष्वघदर्शनं ५८ ७६५ नीरजस्तमतासत्वशु
द्धिर्निस्पृहताशमः एतैरुपायैःसंशुद्धःसत्वयोग्यमृतीभवेत् ५९ ६६ तत्वस्मृतेरुपस्थानात्सत्वयो

४४

गास्परिक्षयात् कर्मणां सन्निकर्षाच्च सतां योगः प्रवर्तते ६० ७६२ शरीरसंक्षये यस्य मनः सत्वस्थमीश्वरं अवि
पुलमतिः सम्यक् सजातिस्मरतामियात् ६१ ७६८ यथाहि भरतो वर्णैर्वर्ण्ययत्यात्मनस्तनुं नानारूपाणि कुर्वाण
स्तथात्मा कर्मजास्तनूः ६२ ७६९ कालकर्मात्मबीजानां दोषैर्मातुस्तथैव च गर्भस्य वैकृतं दृष्टमंगहीनादिज
न्मनः ६३ ७० अहंकारेण मनसा गत्या कर्मफलेन च शरीरेण च नात्मायं मुक्तपूर्वः कदाचन ६४ ७७१
दाता सत्यक्षमी प्राज्ञः शुभकर्मा जितेंद्रियः तपोरतो योगशीलो न रागैरभिभूयते ६५ ७२ वर्त्या
धारस्नेहयोगाद्यथा दीपस्य संस्थितिः विक्रियापि च दृष्टैवमकाले प्राणसंक्षयः ६६ ७३ अनंतारश्मय
स्तस्य दीपवद्यः स्थितो हृदि सितासिताः कद्रुनीलाः कपिलाः पीतलोहिताः ६७ ७४ ऊर्ध्वमेकः स्थित
स्तेषां यो भित्वा सूर्यमंडलं ब्रह्मलोकमतिक्रम्य तेन याति परां गतिं ६८ ७५ यदस्यान्यं रश्मिशतमूर्ध्वमेव
व्यवस्थितं तेन देवशरीराणि सधामानि प्रपद्यते ६९ ७६ येऽनेकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः इह
कर्मोपभोगाय तैः संसरति सोऽवशः ७० ७७ वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च आर्त्या गत्या त
था गत्या सत्येन ह्यनृतेन च ७१ ७८ श्रेयसा सुखदुःखाभ्यां कर्मभिश्च शुभाशुभैः निमित्तशाकुनज्ञा

४४

८८

नयहसंयोगजैः फलैः ७२ ७९ तारानक्षत्रसंचारैर्जागरैः स्वप्नजैरपि आकाशपवनज्योतिर्जलभूतिमिरैस्तथा
७३ ८० मन्वंतरैर्युगश्राप्यामंत्रौषधिफलैरपि वित्तात्मानंवेद्यमानंकारणंजगतस्तथा ७४ ८१ अहंका
रःस्मृतिर्मेधाद्वेषोबुद्धिःसुखंधृतिः इंद्रियांतरसंचारइच्छाधारणजीविते ७५ ८२ स्वर्गःस्वप्नश्चभावा
नांप्रेरणामनसोगतिः निमेषश्चेतनायत्नश्चादानंपांचभौतिकं ७६ ८३ यतएतानिलिंगानिदृश्यंते
परमात्मनः तस्मादस्तिपरोदेहादात्मासर्वगईश्वरः ७७ ८४ बुद्धींद्रियाणिसार्थानिमनःकर्मेंद्रिया
णिच अहंकारश्चबुद्धिश्चपृथिव्यादीनिचैवच ७८ ८५ अव्यक्तमात्माक्षेत्रज्ञःक्षेत्रस्यास्यनिगद्य
ते ईश्वरःसर्वभूतस्थःसन्नसत्सदसंश्चयः ७९ ८६ बुद्धेरुत्पत्तिरव्यक्तात्ततोहंकारसंभवः तन्मात्रा
दीन्यहंकारादेकोत्तरगुणानिच ८० ८७ शब्दस्पर्शश्चरूपंचरसोगंधश्चतद्गुणाः योयस्मान्निसृतः
श्चैषांसतस्मिन्नेवलीयते ८१ ८८ यथात्मानंसृजत्यात्मातथाकः कथितोमया विपाकात्त्रिप्र
काराणांकर्मणामीश्वरोपिसन् ८२ ८९ सत्वंरजस्तमश्चैवगुणास्तस्यैवकीर्तिताः रजस्तमोभ्यामा
विष्टश्चक्रवद्भ्राम्यतेहिसः ८३ ९० अनादिरादिमांश्चैवसएवपुरुषःपरः लिंगेंद्रियग्राह्यरूपःसवि

४५

कारउदाहृतः ८४ ७९१ पितृयाणोजवीथ्याश्चयदगस्त्यस्यचांतरं तेनाग्निहोत्रिणोयांतिस्वर्गकामादिवंप्र
ति ८५ ७९२ येचदानपराःसम्यगष्टाभिश्चगुणैर्युताः तेपितेनैवमार्गेणसत्यव्रतपरायणाः ८६ ९३ त
त्राष्टाशीतिसाहस्त्रामुनयोगृहमेधिनः पुनरावर्तिनोबीजभूताधर्मप्रवर्तकाः ८७ ७९४ सप्तर्षिनागवी
थ्यंतर्देवलोकंसमाश्रिताः तावंतएवमुनयःसर्वारंभविवर्जिताः ८८ ९५ तपसाब्रह्मचर्येणसंगत्यागे
नमेधया तत्रगत्वावतिष्ठंतेयावदाभूतसंप्लवं ८९ ९६ यतोवेदाःपुराणानिविद्योपनिषदस्तथा श्लोकाः
सूत्राणिभाष्याणियच्चकिंचनवाङ्मयं ९० ७९७ वेदानुवचनंयज्ञोब्रह्मचर्यंतपोदमः श्रद्धोपवास
स्वातंत्र्यमात्मनोज्ञानहेतवः ९१ ७९८ सह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेवच द्रष्टव्यस्त्वथमंतव्यःश्रो
तव्यश्चद्विजातिभिः ९२ ९९ यएवमेनंविंदंतियेचारण्यकमाश्रिताः उपासतेद्विजाःसत्यंश्रद्धयाप
रयायुताः ९३ ८०० क्रमात्तेसंभवंत्यर्चिरहःशुक्लंतथोत्तरं अयनंदेवलोकंचसवितारंसवैद्युतं
९४ ८०१ ततस्तान्पुरुषोभ्येत्यमानसोब्रह्मलौकिकान् करोतिपुनरावृत्तिस्तेषामिहनविद्यते
९५ ८०२ यज्ञेनतपसादानैर्येहिस्वर्गजितोनराः धूमंनिशांकृष्णपक्षंदक्षिणायनमेवच ९६ ४५

८०३ पितृलोकंचंद्रमसंवायुंवृष्टिंजलंमहीं क्रमात्तेसंभवंतीहपुनरेवंव्रजंतिच ९७ ८०४ एतद्योनवि
जानातिमार्गद्वितयमात्मवान् दंदशूकः पतंगोवाभवेत्कीटोथवाकृमिः ९८ ८०५ ऊरुस्थोत्तानचरणः
सव्येन्यस्योत्तरंकरं उत्तानंकिंचिदुन्नम्यमुखंविष्टभ्यचोरसा ९९ ८०६ निमीलिताक्षःसत्वस्थोदंतैर्दं
तानसंस्पृशन् तालुस्थाचलजिह्वश्चसंवृतास्यःसुनिश्चलः २०० ८०७ सन्निरुध्येंद्रियग्रामंनातिनी
चोच्छ्रितासनः द्विगुणंत्रिगुणंवापिप्राणायाममुपक्रमेत् १ ८०८ ततोध्येयस्थितोयोसौहृदयेदीपव
त्प्रभुः धारयेत्तत्रचात्मानंधारणांधारयन्बुधः २ ८०९ अंतर्धानंस्मृतिःकांतिर्दृष्टिःश्रोत्रज्ञतातथा नि
जंशरीरमुत्सृज्यपरकायप्रवेशनं ३ ८१० अर्थानांछंदतःसृष्टिर्योगसिद्धेस्तुलक्षणं सिद्धेयोग
त्यजन्देहममृतत्वायकल्पते ४ ८११ अथवाप्यभ्यसन्वेदंन्यस्तकर्मावनेवसन् अयाचिताशी
मितभुक्परांसिद्धिमवाप्नुयात् ५ ८१२ न्यायागतधनस्तत्वज्ञाननिष्ठोतिथिप्रियः श्राद्धकृत्सत्य
वादीचगृहस्थोपिविमुच्यते ६ ८१३ इत्यध्यात्मप्रकरणं महापातकजान्घोरान्नरकान्प्राप्य

४६

दारुणान् कर्मक्षयात्सञ्जायंते महापातकिनस्त्विह ७ ॥१४ मद्यगन्धश्च करोट्यां ब्रह्महा योनिमृच्छति खरपुल्क
सेवनानां सुरापो नात्र संशयः ८ ॥१५ क्रिमिकीटपतंगत्वं स्वर्णहारी समाप्नुयात् तृणगुल्मलतात्वं च क्रमशो
गुरुतल्पगः ९ ॥१६ ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः हेमहारी च कुनखी दुश्चर्मा गुरुतल्पगः
१० ॥१७ यो येन संवसत्येषां स तल्लिंगोभिजायते अन्नहर्ता मयावी स्यान्मूतिवक्त्रस्तु सूचकः ११ ॥१९ प
रस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः २० हीनजातौ प्रजायेत पर
रत्नापहारकः पत्रशाकं बर्हिः शिखी हृत्वा गंधान् छुछुंदरी शुभान् १४ ॥२१ मूषको धान्यहारी स्याद्यानमु
ष्ट्रः फलं कपिः जलं प्लवः पयः काको गृहकारी ह्युपस्करं १५ ॥२२ मधुदंशः पलं गृध्रो गां गोधाग्नि
बकस्तथा श्वित्री वस्त्रं रसं श्वा च चीरी लवणाहारकः १६ ॥२३ प्रदर्शनार्थमेतत्तु मयोक्तं स्तेनकर्मि
णि द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः १७ ॥२४ यथाकर्मफलं प्राप्य तिर्यक्त्वं कालपर्ययात्
जायंते लक्षणभ्रष्टा दरिद्राः पुरुषाधमाः १८ २५ ततो निःकल्मषीभूताः कुले महति भोगिनः जा
यंते विद्ययोपेता धनधान्यसमन्विताः १९ ॥२६ विहितस्याननुष्ठानान्निंदितस्य च सेवनात् अ ४६

निग्रहाच्चेंद्रियाणांनरः पतनमृच्छति २० ८२७ तस्मात्तेनेहकर्तव्यंप्रायश्चित्तंविशुद्धये एवमस्यांतरात्माचलो
कश्चैवप्रसीदति २१ ८२८ प्रायश्चित्तमकुर्वाणाः पापेषुनिरतानराः अपश्चात्तापिनः कष्टान्नरकान्
यांतिदारुणान् २२ २९ तामिस्रंलोहशंकुंचमहानिरयशाल्मली रौरवंकुड्मलंपूतिमृत्तिकांकालसूत्र
कं २३ ८३० संघातंलोहितोदंचसविषंसंप्रतापनं महानरककाकोलंसंजीवनंमहापथं २४ ८३१ अ
वीचिमंधतामिस्रंकुंभीपाकंतथैवच असिपत्रवनंचैवतपनंचैकविंशकं २५ ८३२ महापातकजैर्घो
रैरुपपातकजैस्तथा अन्वितायांत्यचरितप्रायश्चित्तानराधमाः २६ ८३३ प्रायश्चित्तैरपैत्येनोयदज्ञा
नकृतंभवेत् कामतोव्यवहार्यस्तुवचनादिहजायते २७ ८३४ ब्रह्महामद्यपस्तेनस्तथैव
गुरुतल्पगः महापातकिनस्त्वेतेयश्चैतैः सहसंवसेत् २८ ३५ गुरूणामध्यधिक्षेपोवेदनिंदासु
हृद्वधः ब्रह्महत्यासमंज्ञेयमधीतस्यचनाशनं २९ ३६ निषिद्धभक्षणंजैह्म्यमुत्कर्षेचवचोऽनृतं
रजस्वलामुखास्वादः सुरापानसमानितु ३० ३७ अश्वरत्नमनुष्यस्त्रीभूधेनुहरणंतथा निक्षे

४७

पस्यचसर्वद्विसुवर्णस्तेयसंमितं ३१ ८३८ सखिभार्याकुमारीषुस्वयोनिषंत्यजासुच सगोत्रासुसुतस्त्रीषुगुरुतल
ल्पसमंस्मृतं ३२ ८३९ पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि मातुःसपत्नींभगिनीमाचार्यतनयांतथा
३३ ८४० आचार्यपत्नींतनयांगछंस्तुगुरुतल्पगः छित्वालिंगंवधस्तस्यसकामायाःस्त्रिया अपि ३४
८४१ गोवधोव्रात्यतास्तेयमृणानांचानपक्रिया अनाहिताग्निता ५८ पण्यविक्रयःपरिवेदनं ३५ ४२
८ भृतादध्ययनादानंभृतकाध्यापनंतथा पारदार्यपारवित्त्यंवार्धुष्यंलवणक्रिया ३६ ४३ स्त्रीशू
द्रविट्क्षत्रवधोनिंदितार्थोपजीवनं नास्तिक्यंव्रतलोपश्चसुतानांचैवविक्रयः ३७ ४४ धान्यकुप्यपशु
स्तेयमयाज्यानांचयाजनं पितृमातृसुतत्यागस्तडागारामविक्रयः ३८ ४५ कन्यासंदूषणंचैवपरिवे
दकयाजनं कन्याप्रदानंतस्यैवकौटिल्यंव्रतलोपनं ३९ ४६ आत्मनोर्थेक्रियारंभोमद्यपस्त्रीनिषेवणं
स्वाध्यायाग्निसुतत्यागोबांधवत्यागएवच ४० ४७ इंधनार्थंद्रुमछेदःस्त्रीहिंसौषधिजीवनं हिंस्रयं
त्रविधानंचव्यसनान्यात्मविक्रयः ४१ ८४८ शूद्रप्रेष्यंहीनसख्यंहीनयोनिनिषेवणं तथैवानाश्रमे
वासःपरान्नपरिपुष्टता ४२ ८४९ असछास्त्राधिगमनमाकरेष्वधिकारिता भार्यायाविक्रयश्चैषा ४७

94

मेकैकमुपपातकं ४३ ८५० शिरःकपालीध्वजवान्भिक्षाशीकर्मवेदयन् ब्रह्महाद्वादशाब्दानिमितभुक्शुद्धि
माप्नुयात् ४४ ५१ ब्राह्मणस्यपरित्राणाद्गवांद्वादशकस्यवा तथाश्वमेधावभृथस्नानाद्वाशुद्धिमाप्नुयात्
४५ ८५२ दीर्घतीव्रामयग्रस्तंब्राह्मणंगामथापिवा दृष्ट्वापथिनिरातंकंकृत्वावाब्रह्महाशुचिः ४६ ८५३
आनीयविप्रसर्वस्वंहृतंघातितएववा तंनिमित्तंक्षतःशस्त्रैर्जीवन्नपिविशुध्यति ४७ ८५४ लोमभ्यःस्वा
हेत्यवंहिलोमप्रभृतिवैतनुं मज्जांतांजुहुयाद्वापिमंत्रैरेभिर्यथाक्रमं ४८ ५५ संग्रामेवाहतोलक्ष्यभूतःशु
द्धिमवाप्नुयात् मृतःकल्पःप्रहारार्तोजीवन्नपिविशुध्यति ४९ ८५६ अरण्येनियतोजप्त्वात्रिःवै
वेदसंहितां शुध्यतेवामिताशील्वाप्रतिस्रोतःसरस्वती ५० ८५७ पात्रेधनंवापर्याप्तंदत्वाशुद्धिमवा
प्नुयात् आदातुश्चविशुध्यर्थमिष्टिर्वैश्वानरीस्मृती ५१ ८५८ यागस्थक्षत्रविड्घातीचरेद्ब्रह्मह
णिव्रतं गर्भहाचयथावर्णंतथात्रेयीनिषूदकः ५२ ८५९ चरेद्व्रतमहत्वापिघातार्थंचेत्समागतः द्विगु
णंसवनस्थेचब्राह्मणेव्रतमादिशेत् ५३ ८६० सुरांबुघृतगोमूत्रपयसामग्निसंनिभं सुरापोन्यत

४८

बालवासाजटीवापिब्रह्महत्याव्रतंचरेत् पिण्याकंवाकणान्वापिभ
मंपीत्वामरणाच्छुद्धिमृच्छति ५४ ८६१ अज्ञानात्तुसुरांपीत्वारेतोविण्मूत्रमेववा पुनः संस्कारमर्हति त्रयोवर्णा
क्षयेत्रिसमानिशि ५५ ८६२ पतिलोकंनसायातिब्राह्मणीयासुरांपिबेत् इहैवसाशुनीगृध्रीसुकरीचापि
विजातयः ५६ ८६३ ब्राह्मणस्वर्णहारीतुराज्ञेमुसलमर्पयेत् स्वकर्मख्यापयंस्तेनहतोमुक्तोपि
वाशुचिः ५८ ६५ अनिवेद्यनृपेशुध्येत्सुरापव्रतमाचरन् आत्मतुल्यंसुवर्णंवादद्यात्साद्विजतुष्टि
तप्ते ऽयः शयनेसुप्त्वा दायस्यायोषितासह गृहीत्वोत्कृत्यवृषणौनैर्ऋत्यांचोत्सृजे
त्कृत् ५९ ६६ प्राजापत्यंचरेत्कृच्छ्रंसमांवागुरुतल्पगः चांद्रायणंवात्रीन्मासानभ्यसेद्देहसंहिता
न्तु ६० ६७ एभिस्तुसंवसेद्योवैवत्सरंसोपितत्समः कन्यांसमुद्वहेदेषांसोपवासामकिंचनां ६२ ६९ ४८
६१ ६८ चांद्रायणंचरेः सर्वानवकृष्टान्निहन्यतु शूद्रोधिकारहीनोपिकालेना
इतिमहापातकप्रकरणं पंचगव्यपिबनोगोघ्नोमासमासीतसंयतः गोष्ठाशयीगोनुगामीगोप्र
नेनशुध्यति ६३ ७०


दानेनशुध्यति ६४ ८७१ कृच्छ्रंचैवातिकृच्छ्रंचचरेद्वापिसमाहितः दद्यात्त्रिरात्रंचोपोष्यवृषभैकादशाश्च
गाः ६५ ८७२ उपपातकशुद्धिस्यादेवंचांद्रायणेनवा पयसावापिमासेनपराकेनाथवापुनः ६६ ८७३
वृषभैकसहस्रागाद्दद्यात्क्षत्रवधेपुमान् ब्रह्महत्याव्रतंवापिवत्सरत्रितयंचरेत् ६७ ७४ वैश्यहाब्दं
चरेदेतद्दद्याद्वैवशतंगवां षण्मासाञ्छूद्रहाप्येतद्दद्याद्दशाथवा ६८ ८७५ दुर्वृत्तब्रह्मक्षत्रविट्शूद्र
योषाःप्रमाप्यतु दृतिंधनुर्वस्तमविंक्रमाद्दद्याद्विशुद्धये ६९ ८७६ अप्रदुष्टांस्त्रियंहत्वाशूद्रहत्याव्रतंचरे
त् अस्थिमतांसहस्रंतु तथानस्थिमतामनः ७० ८७७ मार्जारगोधानकुलमंडूकाश्वपतत्रिणः हृ
त्वात्र्यहंपिबेत्क्षीरं कृच्छ्रंवापादिकंचरेत् ७१ ८७८ गजेनीलवृषाःपंचशुकेवत्सोद्विहायनः खर
राजमेषेषुवृषोदेयः क्रौंचेत्रिहायनः ७२ ८७९ हंसश्येनकपिक्रव्याज्जलस्थलशिखंडिनः भासंचह
त्वादद्याद्गामक्रव्यादांस्तुवत्सिकां ७३ ८० उरगेष्वायसोदंडःपंडकेत्रपुसीसकं कोलेघृतघटोदेयंउ
ष्ट्रेगुंजाहयेंशुकं ७४ ८१ तित्तिरौतुतिलद्रोणंगजादीनामशक्नुवन् दानंदातुंचरेत्कृच्छ्रमेकैकस्यवि
शुद्धये ७५ ८२ किंचित्सास्थिवधेदेयंप्राणायामस्त्वन।स्थिके वृक्षगुल्मलतावीरुत्छे

४९

दनेजप्यमकृच्छातं ७६ ८८३ स्यादोषधिवृथाछेदक्षीरागीगोनुगोदिनं पुंश्चलीवानरखरैर्दष्टःश्वोष्ट्रादिवाय
सैः ७७ ८८४ प्राणायामंजलेकृत्वाघृतंप्राश्यविशुध्यति फलपुष्पान्नरसजसत्वघातेघृताशनं ७८ ८८५
यन्मेद्यरेतइत्साभ्यांस्कन्नंरेतोभिमंत्रयेत् स्तनांतरंभ्रुवोर्मध्यंतेनानामिकयास्पृशेत् ७९ ८८६ मयितेजइति
छायांस्वांदृष्ट्वांबुगतांजपेत् सावित्रीमशुचौदृष्टेचापल्येचान्रुतेपिच ८० ८७ अवकीर्णीभवेद्गत्वाब्रह्म
चारीतुयोषितं गर्दभंपशुमालभ्य नैर्ऋतंसविशुध्यति ८१ ८८ भैक्षाग्निकार्येत्यक्त्वातुसप्तरात्रम
नातुरः कामावकीर्णइत्साभ्यांजुहुयादाहुतिद्वयं ८२ ८८९ उपस्थानंततः कुर्यात्समासिंचत्वनेन
तु मधुमांसाशनेकार्यः कृच्छ्रःशेषव्रतानितु ८३ ८९० प्रतिकूलंगुरोःकृत्वाप्रसाद्यैवविशुध्यति कृच्छ्
त्रयंगुरुःकुर्यान्म्रियतप्रहितोयदि ८४ ९१ क्रियमाणोपकारेतुमृतेविप्रेनपातकं मिथ्याभिशंसिनो
दोषाद्विःसमोभूतवादिनः ८५ ९२ मिथ्याभिशस्तदोषंचसमादत्तेमृषावदन् महापापोपपापाभ्यां
योभिशंसेन्मृषापरं ८६ ९३ अब्भक्षोमासमासीतसजापीनियतेंद्रियः अभिशस्तोमृषाकृच्छ्रं
चरेदाग्नेयमेववा ८७ ९४ निर्वपेत्तुपुरोडाशंवायव्यंपशुमेवच अनियुक्तोभ्रातृजायांगत्वाचांद्रा

४९

यणंचरेत् ८८ ९५ त्रिरात्रांते घृतं प्राश्य गत्वोदक्यां विशुध्यति त्रीन्कृछ्रानाचरेद्व्रात्ययाजकोभिचरन्नपि ८
८ ९६ वेदप्लावी यवान्प्राश्य सत्काचछ्रणागतं ब्रह्मचारी वसेन्गोष्ठे मासमेकं पयोव्रतः ९० ९७ गा
यत्रीजप्यनिरतो मुच्यतेऽसत्प्रतिग्रहात् प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः ९१ ९८ नग्नः
स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियं गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः ९२ ९९ बध्वावावास
साक्षिप्रं प्रसाद्योपवसेद्दिनं विप्रदंडोद्यमे कृछ्रस्त्वतिकृछ्रो निपातने ९३ १०० कृछ्रातिकृछ्रोस
कृपाते कृछ्रोभ्यंतरशोणिते देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ९४ प्रायश्चित्तं प्रकल्प्यं स्या द्यं
घत्र चोक्ता न निःकृतिः १०१ दासीकुंभं बहिर्ग्रामान्निनयेरन्स्वबांधवाः पतितस्य बहिः कुर्युः सर्व
कार्येषु चैव तं ९५ १०२ चरितव्रत आयाते निनयेरन्नवं घटं जुगुप्सेयुर्न चाप्येनं संपिबेयुश्च सर्वशः
९६ १०३ पतितानामेष एव विधिः स्त्रीणां प्रकीर्तितः वासो गृहांतिके देयमन्नं वासः सरक्षणं ९७
१०४ नीचाभिगमनं गर्भपातनं भर्तृहिंसनं विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवं ९८ १०५ श
रणागतबालस्त्रीहिंसकान्संवसेन्न तु चीर्णव्रतानपि सतः कृतघ्नसहितानिमान् ९९ १०६ घट



Acc. No. ~~2563~~ M-1670

Title - याज्ञवल्कीय धर्मशास्त्र.
(=याज्ञवल्क्य स्मृति.)

Author - याज्ञवल्क्य.

Date - शके 1668.

Sub - स्मृति, धर्मशास्त्र

Folio - 53.

Xerox - 105

१

॥श्रीगणेशाय नमः॥ योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोब्रुवन् वर्णाश्रमेतराणां नो
ब्रूहि धर्मानशेषतः॥१॥ मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन्॥ यस्मिन्
देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत॥२॥ पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः॥ वे
दाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥३॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः
यमापस्तंबसंवर्ताः कात्यायनबृहस्पती॥४॥ पराशरव्याससंखलिखिता दक्षगौत
मौ॥ शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः॥५॥ देशे काले उपायेन द्रव्यं श्रद्धासमन्वि
तं॥ पात्रे प्रदीयते यत्तत् सकलं धर्मलक्षणं॥६॥ श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमा
त्मनः॥ सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतं॥७॥ इज्याचारदमाहिंसादानस्वा
ध्यायकर्मणां॥ अयं तु परमो धर्मो यद्योगेनात्मदर्शनं॥८॥ चत्वारो वेदधर्मज्ञाः पर्षत्त्रैवि

उ६

२

पा० धु०

५०

पवर्जितज्ञातिमध्यस्थोयवसंगवां प्रदद्यात्तथमंगोभिः सत्कृतस्यहिंसाक्रिया १०० ९०७ विख्यातदोषंकुर्वस्तप र्षदोनुमतंव्रतं अनभिख्यातदोषस्तुरहस्यंव्रतमाचरेत् १ ९०८ त्रिरात्रोपोषितोजप्त्वाब्रह्महात्वघमर्षणं अंतर्जलेविशुध्येतगांदत्वाचपयस्विनीं २ ९०९ लोमभ्यः स्वाहेत्यथवादिवसंमारुतासिनः जलेस्थित्वा चजुहुयाच्चत्वारिंशत्घृताहुतीः ३ ९१० त्रिरात्रोपोषितोहुत्वाकूष्मांडीभिर्घृतंशुचिः सुरापः स्वर्णहारी चरुद्रजापितलेस्थितः ४ ९११ सहस्रशीर्षजापीतुमुच्यतेगुरुतल्पगः गोर्देयाकर्मणोस्यांतेपृथग्गोभिः पयस्विनी ५ ९१२ प्राणायामशतंकुर्यात्सर्वपापापनुत्तये उपपातकजातानामनादिष्टस्यचैवहि ६ ९१३ ओंकाराभिष्टुतंसोमसलिलंपावनंपिबेत् कृत्वातुरेतोविण्मूत्रप्राशनंचद्विजोत्तमः ७ ९१४ निशायांवा दिवावापियदज्ञानकृतंभवेत् त्रैकाल्यसंध्याकरणात्तत्सर्वंविप्रणश्यति ८ ९१५ शुक्रियारण्यकज पोगायत्र्याश्चविशेषतः सर्वपापहराः श्रोक्तोरुद्रैकादशिनीतथा ९ ९१६ यत्रयत्रचसंकीर्णमात्मा नंमन्यतेद्विजः तत्रतत्रतिलैर्होमोगायत्र्यावाचनंतथा १० ९१७ वेदाभ्यासरतंक्षांतंमहायज्ञक्रियार तं नस्पृशंतीहपापानिमहापातकजान्यपि ११ ९१८ वायुभक्षोदिवातिष्ठेद्रात्रिंनीत्वाप्सुसूर्यदृक्

५०

जप्त्वासहस्रंगायत्र्याःशुध्येद्ब्रह्मवधादृते १२ ९१९ इतिरहस्यप्रायश्चित्तप्रकरणं ब्रह्मचर्यंदयाक्षांतिर्दानं
सत्यमकल्कता अहिंसाऽस्तेयमाधुर्येदमश्चेतियमाःस्मृताः १३ ९२० स्नानमौनोपवासेज्यास्वाध्यायो
पस्थनिग्रहः नियमागुरुशुश्रूषाशौचाक्रोधाप्रमादता १४ ९२१ गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशो
दकं जग्ध्वापरेह्न्युपवसेत्कृच्छ्रंसांतपनंचरेत् १५ ९२२ पृथक्सांतपनद्रव्यैःषडहःसोपवासकः स
प्ताहेनतुकृच्छ्रोयंमहासांतपनस्मृतः १६ ९२३ पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः प्रत्येकंप्र
त्यहंपीतैःपर्णकृच्छ्रउदाहृतः १७ ९२४ तप्तक्षीरघृतांबूनामेकैकंप्रत्यहंपिबेत् एकरात्रोपवास
श्चतप्तकृच्छ्रउदाहृतः १८ २५ एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनचैकेनपादकृच्छ्रः
प्रकीर्तितः १९ २६ यथाकथंचित्त्रिगुणःप्राजापत्योयमुच्यते अयमेवातिकृच्छ्रःस्यात्पाणिपू
रान्नभोजनः २० २७ कृच्छ्रातिकृच्छ्रःपयसादिवसानेकविंशतिं द्वादशाहोपवासेनपराकःपरि
कीर्तितः २१ ९२८ पिण्याकाचामतक्रांबुसक्तूनांप्रतिवासरं एकैकमुपवासश्चकृच्छ्रःसौम्यो

५२

यंमुच्यते २२ ९२९ एषांत्रिरात्रमभ्यासादेकैकस्ययथाक्रमं तुलापुरुषइत्येषज्ञेयःपंचदशाहिकः २३ ९३०
तिथिवृध्याचरेत्पिंडान्शुक्ले शिखंडसंमितान् एकैकंह्रासयेत्कृष्णेपिंडंचांद्रायणंचरेत् २४ ९३१
यथाकथंचित्पिंडानांचत्वारिंशच्छतद्वयं मासेनैवोपभुंजीतचांद्रायणमथापरं २५ ९३२ कुर्यात्त्रिषवे
णस्नायीकृच्छ्रंचांद्रायणंतथा पवित्राणिजपेत्पिंडान्गायत्र्याचाभिमंत्रयेत् २६ ३३ अनादिष्टे
षुपापेषुशुद्धिश्चांद्रायणेनच धर्मार्थंयश्चरेदेतच्चंद्रस्यैतिसलोकतां २७ ३४ कृच्छ्रकृद्धर्मकामस्तु
महतींश्रियमाप्नुयात् यथागुरुक्रतुफलंप्राप्नोतिसुसमाहितः २८ ९३५ धर्मप्रश्नस्तथाद्यानं
वर्णागर्भादिकाःक्रियाः ब्रह्मचारिविधिश्चैवतथैवाचमनक्रिया २९ ९३६ स्नानाग्निकार्यंशुश्रू
षाव्रतस्वाध्यायसज्ज्ञता गुरोरनुज्ञास्नातस्यविवाहश्चरितस्त्रियाः ३० ३७ पुत्राःसंकरजाःकर्म
भोज्याभोज्यविचारणा द्रव्यशुद्धिर्द्विजातीनांप्रशंसादानमेवच ३१ ३८ विधिःश्राद्धस्यपितृ
णांपुष्टिर्नानाविधास्तथा विनायकोपशांतिश्चग्रहाणांशांतिकर्मच ३२ ९३९ कर्मेषाप्रथमः ५२

ध्यायेराजधर्मश्च कीर्तितः॥ व्यवहारविधिश्चादौ समासेनोपदर्शितः॥३३॥१४१॥ऋणादानं ततश्चाधि
स्तथोपनिधिसाक्षिणः॥ लेख्यं दिव्यानि वै भज्यं सीमायाश्च विधिक्रमः॥३४॥१४२॥दायं द्व्यक्रयो
दास्यं त्रैविद्यं वेतनं तथा॥ द्यूतं व्याघातकलहो व्यामिश्रं कूटसाक्षिकं॥३५॥१४३॥मानानि चौरपण्यस्त्री
ग्रहणं दण्डशासनं॥ द्वितीयाध्याये निर्दिष्टः एष प्रक्रमणाक्रमः॥३६॥१४४॥प्रेतशुद्धिः समाख्याता वि
क्रेयाविक्रेयास्तथा॥ वानप्रस्थं परिव्राजं तत्त्वध्यानविचारणा॥३७॥१४५॥सुरापाणकृतानां च ग
र्हितो सन्निकीर्तनं॥ नरकाण्यां महापापं तथा चैवोपयापिनां॥३८॥१४६॥प्रायश्चित्तेन चैतेषां स
मस्तानि तथैव च॥ कृच्छ्रचान्द्रायणादीनि व्रतानि विविधानि च॥३९॥१४७॥पवित्राण्युपदिष्टानि
तृतीयाध्यायसंग्रहः॥४०॥१४८॥श्रुत्वैतानखिलान्धर्मान्याज्ञवल्क्येन भाषितान्॥ इदमूचु
र्महात्मानं योगीन्द्रममितौजसं॥४१॥१४९॥य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः॥ इह लोके सु
खं प्राप्य ते यास्यन्ति त्रिविष्टपं॥४२॥१५०॥विद्यार्थी प्राप्नुया[illegible] द्विद्यां धनकामो धना

५२

निच्वा॥ आयुःकामस्तथैवायुःश्रीकामोमहतींश्रियं॥४॥१९५१॥ धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थ
माप्नुयात्॥ कामानवाप्नुयात्कामीप्रजार्थीप्राप्नुयात्प्रजां॥४॥ श्लोकत्रयमपिह्यस्माद्यःश्रावयि
ष्यति॥ पितॄणांतस्यतृप्तिःस्यादक्षय्यानात्रसंशयः॥४॥१९५३॥ यइदंश्रावयेद्विद्वान्द्विजान्पर्वसुसं
यतः॥ अश्वमेधफलंतस्यतद्भवाननुमन्यतां॥४॥१९५३॥ ब्राह्मणःपात्रतांयातिक्षत्रियो
विजयीभवेत्॥ वैश्यस्तुधान्यधनवानस्यशास्त्रस्यधारणात्॥४॥१९५४॥ श्रुत्वैतद्या
ज्ञवल्क्यस्तुप्रीतात्मामुनिभाषितं॥ एवमस्त्वितिहोवाचनमस्कृत्यस्वयंभुवे॥ ॥४॥
॥ ॥१९५५॥ ॥इतियाज्ञवल्कीयेधर्मशास्त्रेतृतीयोऽध्यायः॥ ॥समाप्तमिदंशास्त्रं॥ छ॥
॥ ॥ शाके१६६८ आश्विनकृष्णदशम्यांसमाप्तिमगमत्

५२

104

[OrderDescription]
,CREATED=30.09.20 16:45
,TRANSFERRED=2020/09/30 at 17:00:13
,PAGES=105
,TYPE=STD
,NAME=S0003792
,Book Name=M-1670-VALKIYE DHARAMSHASTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,